दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

■ पृष्ठ-11 ■ वर्ष-5 ■ अङ्क-331 | 1 | सितम्बर 20, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ शरद्-ऋतुः
सूर्यः दक्षिणायनम् भाद्रपदशुक्लनवमी
आश्विन् 04 प्रविष्ठांशः मङ्गलमयः भवेत्

2 नवदेहल्यां 'उद्योन्मुख-वैश्विक-व्यवस्थायां भारत-नेपाल-सम्बन्धानां पुनर्कल्पना' इत्यस्मिन् विषये अन्ताराष्ट्रिय-चर्चासत्रम् सम्बोधितवान् नेपालदेशस्य वित्तमन्त्री

4 हिमाचले शिक्षकाणां विपुलनियुक्तिः; विद्यालयेषु पूरयिष्यन्ते द्विसहस्रं नूतनपदानि-मुख्यमन्त्री सुक्खू

11 पहाड़ी गल्लां विशेषांक (रविवासरीयः)

## अद्यतनीयं सुभाषितम्

**आतुरस्य कुतो निद्रा त्रस्तस्यामर्षितस्य च।**
**अर्थं चिन्तयतो वापि कामयानस्य वा पुनः।।**

भावार्थः- रोगी या मुसीबत में पडे हुए, भयभीत हुए, क्रोधित, धन प्राप्ति की चिन्ता या कामना करने वाले व्यक्तियों को भला चैन की नींद आ सकती है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११ कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति
संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी, शिवा शर्मा, वत्सदेसराजः, डॉ.पद्मनाभः, डॉ.अभिषेकशर्मा






# जीविकोपार्जनमेलके ५१ सहस्राधिकेभ्यः युवभ्यः नियुक्तिपत्राणि वितरितानि

**नवदेहली, १९ सितम्बर २०२६।**
**हिमसंस्कृतवार्ता:- डॉ विमलेश झा**

प्रधानमन्त्री श्रीनरेन्द्रमोदीमहोदयः शनिवासरे आयोजिते विंशतितमे जीविकोपार्जनमेलके देशस्य ५१ सहस्राधिकेभ्यः युवभ्यः नियुक्तिपत्राणि वितरितवान्। अस्मिन् अवसरे नवनियुक्तकर्मचारिभ्यः आभासीयमाध्यमेन सम्बोधनं कुर्वन् प्रधानमन्त्री अवदत् यत् एते सर्वे युवानः तस्मिन् महत्त्वपूर्णे काले भारतसर्वकारस्य सेवाक्षेत्रे प्रविष्टवन्तः, यदा भारतं महत्त्वपूर्णानि राष्ट्रियलक्ष्याणि साधयितुं द्रुतगत्या अग्रे गच्छति।

प्रधानमन्त्री उक्तवान् यत् २०४७ तमवर्षपर्यन्तं विकसितभारतस्य निर्माणम् देशस्य प्रमुखं लक्ष्यं वर्तते। अस्य महत्त्वाकाङ्क्षिणः लक्ष्यस्य प्राप्तौ देशस्य युवानां महती भूमिका अस्ति। अतः नवनियुक्तैः कर्मचारिभिः राष्ट्रहितं सर्वोपरि स्थापयित्वा विकसितस्य आत्मनिर्भरस्य च भारतस्य निर्माणे योगदानं दातव्यम्।

प्रधानमन्त्री अवदत् यत् मनुष्यः यं पदं स्थानं वा प्राप्नोति, तस्य पृष्ठभूमौ तस्य स्वकीयः परिश्रमः भवति। तेन सह माता-पितृभिः परिवारजनैश्च कृतं त्यागं तपश्चापि तत्र महत्त्वपूर्णं योगदानं वहति। सः नवनियुक्तान् युवजनान् तेषां माता-पितॄन् परिवारजनांश्च हार्दिकैः शुभकामनाभिः अभिनन्दितवान्।

सः युवजनान् सम्बोधयन् अवदत् यत् युवत्वं केवलं स्वस्य उन्नतेः कालः न, अपि तु समाजस्य राष्ट्रस्य च प्रति उत्तरदायित्वनिर्वहणस्य कालः अपि अस्ति। अतः प्रत्येकं युवा राष्ट्रस्य विकासे स्वकीयां प्रतिभां कौशलं च समर्पयेत्।

भारतीययुवानां प्रतिभया विश्वस्य विश्वासः अर्जितः

प्रधानमन्त्रिणा उक्तं यत् भारतस्य युवानां प्रतिभा-कौशलयोः सामर्थ्येन विश्वस्य विश्वासः निरन्तरं वर्धमानः अस्ति। भारतस्य नवोन्मेषपरितन्त्रं द्रुतगत्या विकसितं भवति। देशस्य नवोद्यमसंस्थाः केवलं महानगरेषु एव सीमिताः न सन्ति, अपि तु लघुनगरेषु द्वितीय-तृतीयश्रेणीनगरेषु च अपि नवयुवकाः स्वकीयैः अभिनवप्रयत्नैः नूतनानि अवसराणि सृजन्ति।एतत् भारतस्य युवानां सामर्थ्यस्य आत्मविश्वासस्य च सशक्तं प्रमाणम् अस्ति। प्रधानमन्त्री अवदत् यत् राष्ट्रस्य विकासयात्रायां उद्यमिनः, कृषकाः, महिलाः, युवजनाश्च सक्रियतया सहभागिनः भवन्तु। विकासस्य लाभः समाजस्य सर्वेभ्यः वर्गेभ्यः प्राप्नुयादिति उद्दिश्य सर्वकारेण विविधाः उपक्रमाः प्रारब्धाः सन्ति। लघु-मध्यमोद्यमानां प्रोत्साहनाय तथा उद्यमिनां परस्परसम्पर्कं सुदृढं कर्तुं 'बिजनेस-कनेक्ट' तथा 'एमएसएमई सहयोग-सञ्चालन-मञ्चः' इत्यादयः उपक्रमाः प्रारब्धाः सन्ति। एतेषां माध्यमेन सर्वकारस्य सहयोगः केवलं शासकीयसंस्थाभ्यः सीमितः न भूत्वा उद्यमिभ्यः, कृषकेभ्यः, महिलाभ्यः युवभ्यश्च अपि सुलभतया प्राप्येत इति प्रयासः क्रियते।गतवर्षेषु भारतसर्वकारेण युवानां शिक्षायै कौशलविकासाय च विशेषं महत्त्वं प्रदत्तम् अस्ति। राष्ट्रीयशिक्षानीतिः, कौशलभारताभियानम्, प्रधानमन्त्रिकौशलविकासयोजना, प्रशिक्षुताकार्यक्रमाः च युवानां ज्ञानं कौशलं च वर्तमानस्य परिवर्तमानस्य अर्थतन्त्रस्य आवश्यकतानुसारं विकसितुं महत्त्वपूर्णां भूमिकां निर्वहन्ति।एतेषां योजनानां माध्यमेन यूनां कृते शिक्षायाः, प्रशिक्षणस्य, रोजगारस्य च नूतनाः अवसराः सृज्यन्ते। अद्य देशस्य ४५ स्थानेषु रोजगारमेलस्य आयोजनम् अभवत्। अस्मिन् मेलके केन्द्रसर्वकारस्य विभिन्नेषु मन्त्रालयेषु विभागेषु च सेवायै चयनितेभ्यः युवभ्यः नियुक्तिपत्राणि प्रदत्तानि। नियुक्तिपत्रं प्राप्तवन्तः अभ्यर्थिनः केन्द्रसर्वकारस्य विभिन्नेषु मन्त्रालयेषु विभागेषु च स्वसेवाम् आरप्स्यन्ते। तेषु राजस्वविभागः, रेलमन्त्रालयः, गृहमन्त्रालयः, स्वास्थ्य-परिवारकल्याणमन्त्रालयः, वित्तीयसेवाविभागः, रक्षामन्त्रालयः इत्यादयः प्रमुखाः विभागाः सन्ति। प्रधानमन्त्रिणा नवनियुक्तेभ्यः कर्मचारिभ्यः उज्ज्वलभविष्यस्य शुभकामनाः प्रदत्ताः। सः युवान् राष्ट्रनिर्माणे सक्रियतया योगदानं दातुं तथा २०४७ तमवर्षपर्यन्तं विकसितभारतस्य निर्माणस्य संकल्पं पूरयितुं प्रेरितवान्।



# जी-20 देशेषु कॉंप्-21 सङ्कल्पान् समयात् पूर्वमेव सम्पाद्य भारतेन अधिगतम् अद्वितीयं साफल्यम् – प्रधानमन्त्री



प्रधानमन्त्री नरेन्द्रमोदी अवोचत् यत् भारते प्रतिव्यक्ति-कार्बन उत्सर्जनस्य प्रमाणं जागतिक-मध्यमानस्य अर्धादपि न्यूनं वर्तते। नवदेहल्यां पर्यावरणस्य जलवायु-गतिशीलतायाश्च भविष्यम् इत्याख्यस्य अन्ताराष्ट्रिय-सम्मेलनस्य उद्घाटनं कुर्वन् श्रीमोदी न्यरूपयत् यत् विकासशील देशाः प्रायेण अकारणमेव कार्बन-उत्सर्जनार्थम् अनुचित-रूपेण दोषिणः घोषिताः । प्रधानमन्त्रिणा विशेषतया प्रतिपादितं यत् जी-20 समूहे भारतम् एकाकी तादृशं राष्ट्रम् अस्ति, येन पेरिस-नगरे सञ्जाते कॉप-21 शिखरोत्सवे कृताः सङ्कल्पाः निर्धारित समयात् पूर्वमेव साफल्येन पूरिताः।

DDU-GKY
Deen Dayal Upadhyaya
Grameen Kaushalya Yojana
Empowering India • Powering the World

# दीनदयाल उपाध्याय-ग्रामीण-कौशल-योजना-2.0 इत्यस्यान्तर्गतं देशस्य बहुसंख्येषु राज्येषु केन्द्रशासित प्रदेशेषु च चतुस्त्रिंशत्-सहस्र-ग्रामीण-युवकानां प्रशिक्षणं विधास्यते

केन्द्रीय-ग्रामीण-विकास-मन्त्रालयेन आगामि-मासतः देशस्य बहुसंख्येषु राज्येषु केन्द्रशासित-प्रदेशेषु च दीनदयाल उपाध्याय-ग्रामीण-कौशल-योजना-2.0 इत्याख्यायाः अन्तर्गतं प्रायः चतुस्त्रिंशत्-सहस्र-परिमितानां ग्रामीण-युवकानां कौशल-प्रशिक्षणं समारप्स्यते। प्रशिक्षण-वर्गाणां प्रारम्भार्थं सज्जतानां समीक्षा प्रथम-चरणे बिहार-मध्यप्रदेश-राजस्थान-पश्चिमवङ्ग-हिमाचलप्रदेश-तमिलनाडु-प्रभृतिभिः चतुर्दशभिः राज्यैः केन्द्रशासित प्रदेशैश्च सह विहिता। मन्त्रालयेन स्पष्टीकृतं यत् आगामि-वर्षस्य दिसम्बर-मासस्य एकत्रिंशत्-दिनाङ्क यावत् सप्तपञ्चाशत्सहस्राधिक-त्रि-लक्षपरिमिताः ग्रामीण-युवानः अस्यां योजनायां प्रशिक्ष्यन्ते।



# जलप्लावन-विभीषिकातः साहाय्य-प्राप्तये प्रयतमानाय नेपालाय भारतेन एकादश-टन्-परिमिता नूतन-साहाय्य-सामग्री प्रेषिता

भारतेन नेपाल-देशाय एकादश-टन्-परिमिता नूतना साहाय्य-सामग्री प्रेषिता। अस्यां साहाय्य-सामग्र्यां औषधानि, विधिवैद्यक-सामग्र्यः, शिबिराणि स्वच्छता-पेटिकाः, शयन-स्यूताः, अथ च अन्यानि अत्यावश्यक वस्तूनि समाविष्टानि सन्ति। विदेशमन्त्रालयेन विज्ञापितं यत् इयं साहाय्य-सामग्री नेपालीय-पक्षाय विधिवत् समर्पिता। नेपालस्य पुनरुत्थान-प्रयासानां साहाय्यार्थं साहाय्य-सामग्री-वाहकं भारतीय वायुसेनायाः इदं नवमं विमानम् आसीत्। समाजिकसञ्चारपटले विदेश मन्त्री डॉ. एस. जयशङ्करः अवोचत् यत् नेपालस्य पुनर्निर्माण-प्रक्रियां प्रति भारतस्य दृढ-सहयोगः अविच्छिन्न-रूपेण अनुवर्तिष्यते। अवधेयं वर्तते यत् गते मासे नेपाले प्रवृत्ताभिः विनाशकारी-जलाप्लावन-विभीषिकाभिः जन-जीवनं सम्पत्तयश्च गम्भीरतया बाधिताः आसन्।

# नवदेहल्यां 'उद्योन्मुख-वैश्विक-व्यवस्थायां भारत-नेपाल-सम्बन्धानां पुनर्कल्पना' इत्यस्मिन् विषये अन्ताराष्ट्रिय-चर्चासत्रम् सम्बोधितवान् नेपालदेशस्य वित्तमन्त्री



नेपालदेशस्य वित्तमन्त्री डा. स्वर्णिम वागले वर्यः अवदत् यत् भारत-नेपालयोः मध्ये पूर्वमेव विद्यमानानां सुदृढानां सम्बन्धानाम् आधारेण स्वसहभागित्वस्य नवीकरणस्य अवसरः अस्ति। नवदेहल्यां विकासशील-देशानां कृते अनुसंधान-सूचना-प्रणाल्यां आयोजिते 'उद्योन्मुख-वैश्विक-व्यवस्थायां भारत-नेपाल-सम्बन्धानां पुनर्कल्पना' इत्यस्मिन् विषये अन्ताराष्ट्रिय-चर्चासत्रम् संबोधयन्, डा. वागले वर्यः सम्पर्क, आर्थिकसहयोगं च सुदृढीकरणस्य महत्त्वम् अधोरेखितवान् । नेपालस्य वित्तमन्त्रिणा ऋतुदशा-सङ्कटं न्यूनीकर्तुं पूर्वसूचना प्रणालीं, स्थितिस्थापकसंरचनां च समेत्य आपत्कालपूर्व-निवेशस्य विषये अपि अवधानं दत्तम्। ऊर्जा-सहकारस्य, सीमपार-विद्युत्-व्यापारस्य च विषये, डा. वागले-वर्यः भारतीयनिवेशैः समर्थिताः वर्तमान-संयुक्त परियोजनाः अधोरेखितवान्। डा. वागले वर्यः नेपालदेशे सद्यः एव आकस्मिकजलाप्लावनस्य अनन्तरं भारतस्य त्वरितस्य साहाय्यस्य उद्धारस्य च सहयोगस्य अपि प्रशंसाम् अकरोत्। सः इतोऽपि सूचितवान् यत् नेपालस्य प्रधानमन्त्री बालेन्द्रशाहः अस्य वर्षस्य अन्ते भारतस्य यात्रां करिष्यति।

# कालिम्पोङ्ग-पर्वतमण्डलात् पश्चिमबङ्गाल-आरक्षकैः एकः अवैधः अफ़गानी-जनः निगृहीतः



कालिम्पोङ्ग-पर्वतमण्डलात् पश्चिमबङ्गाल-आरक्षकैः एकः अवैधः अफ़गानी-जनः निगृहीतः। गुप्तसूचनानुसारं कार्यं कुर्वन्तः आरक्षकाः अष्टाविंशति-वर्षीयं सैय्यद बिलाल खान इत्येतं गृहीतवन्तः इति आरक्षकाः अवदन्। आरक्षकाधिकारिणः उक्तवन्तः यत् बिलाल खान् इत्यसौ सम्प्रति कलिम्पोङ्ग-नगरे विगत-कतिपयेषु मासेषु भाटकत्वेन अवैधरूपेण निवसति स्म। तस्य निगडनानन्तरं, तेन उक्तं यत् सः अफ़गानिस्तानदेशीयः अस्ति अपि च भारते अवैधरूपेण निवासं कुर्वन् आसीत्। सः कथं भारते प्रविष्टवान्, सुदूरपूर्वदिशि चीन सीमायाः अत्यन्तं समीपस्थं कलिम्पोङ्ग इत्यत्र कथं प्राप्तवान् इत्यपि आरक्षकाः अन्वेषयन्ति। निगडनानन्तरं सः न्यायालये प्रस्तुतः।

# सहस्रं विद्युत्-बसयानानि द्विशतं च डीजल- बसयानानि क्रीतानि भविष्यन्ति, चालकानां परिचालकानां च नियुक्तिः अपि भविष्यति- उपमुख्यमन्त्री मुकेशः




**हिमसंस्कृतवार्ताः- चम्बा ।**
हिमाचल-पथ-परिवहन-निगमे शीघ्रमेव नूतनानां चालकानां परिचालकानां च भर्ती भविष्यति। प्रदेशे सार्वजनिक-परिवहन-व्यवस्थायाः सुदृढीकरणाय सर्वकारः विद्युत्- डीजल-बसयानानां च सङ्ख्यां वर्जयितुम् सज्जतां करोति। विद्युत्-बसयानानां परीक्षणे सफले सति प्रदेशे सहस्रं विद्युत्-बसयानानि द्विशतं च डीजल-बसयानानि क्रेतुं योजना अस्ति। उपमुख्यमन्त्री मुकेश-अग्निहोत्री शनिवासरे चम्बामण्डले नूतनं विद्युत्-बसयानं हरिमङ्गलध्वजेन (हरितझण्डी) प्रेषितवान्। सः अवदत् यत् पर्वतीय-क्षेत्राणां भौगोलिक-परिस्थितीनां मार्गाणां च विचारं कृत्वा विद्युत्-बसयानानि विशेषरूपेण निर्मितानि सन्ति। एतेषां संचालनेन यात्रियों कृते प्रकृष्ट-परिवहन-सुविधायाः प्राप्तेः सह प्रदूषणस्य न्यूनतायामपि साहाय्यं भविष्यति।

### चम्बा-जनपदाय १० विद्युत्-बसयानानि १० डीजल-बसयानानि च लब्धानि

सः अवदत् यत् चम्बाजनपदे परिवहन-व्यवस्थायाः सुदृढीकरणाय १० विद्युत्-बसयानानि १० डीजल-बसयानानि च प्रदत्तानि सन्ति। एतेषां संचालनेन ग्राम्य-दूरस्थक्षेत्रेषु सार्वजनिक- परिवहन-सुविधायाः विस्तारः भविष्यति। सर्वकारस्य लक्ष्यं दुर्गमक्षेत्रान् प्रकृष्ट-बससेवया सह संयोज्य यात्रियों कृते सुरक्षिता सुगमा च परिवहन-सुविधा प्रदातुम् अस्ति। उपमुख्यमन्त्री अवदत् यत् आगामिनि समये चम्बा-जनपदाय लघु-बसयानानि (मिनी बस) अपि दातुं योजना अस्ति। अनेन सङ्कीर्ण- पर्वतीय-मार्गयुक्तेषु क्षेत्रेषु परिवहन-सेवा सुगमा भवितुम् साहाय्यं प्राप्स्यति। वाहनसमूहे विस्तारेण सह एच.आर.टी.सी. संस्थायामपि चालकानां परिचालकानां च नियुक्तिः कृता भविष्यति।






# अटल-आयुर्विज्ञान-विश्वविद्यालयस्य कुलपतेः नियुक्तिं विरुद्ध्य उच्चन्यायालये याचिका; याचिकाकर्तुः नियतं परीक्षितुं लक्ष- द्वय- रूप्यकाणि (२ लक्षं) निक्षेप्तुम् आदेशः

हिमसंस्कृतवार्ताः- शिमला।
हिमाचलप्रदेश- उच्चन्यायालये मण्डी-मण्डलस्य नेरचौक- स्थितस्य अटल- आयुर्विज्ञान-अनुसन्धान- विश्वविद्यालयस्य नवनियुक्तस्य कुलपतेः नियुक्तिं लक्ष्यीकृत्य जनहित- याचिका-माध्यमेन आह्वानं दत्तम् अस्ति। मुख्यन्यायाधीशस्य गुरमीतसिंहसन्धावालिया-महोदयस्य न्यायाधीशस्य बिपिनचन्द्रनेगी-महोदयस्य च खण्डपीठेन याचिकाकर्तुः वास्तविक-मनीषां परीक्षितुं तस्मै पञ्जीयक-कार्यालये लक्ष-द्वय-रूप्यकाणां (२ लक्षं) राशिं निक्षेप्तुम् आदेशः प्रदत्तः।
विदितं स्यात् यत् नोएडा-निवासी याचिकाकर्ता देवाशीष- भट्टाचार्य-महोदयः जनहितयाचिकां प्रविश्य २९ जुलाई २०२६ दिनाङ्कस्य अधिसूचनां प्रत्यवातिष्ठत। याचिकाकर्त्रा न्यायालये कुलपतेः एतां नियुक्तिं निरस्तीकर्तुं याचना कृता।

**पूर्वयाचिकायाः विलोपनवृत्तं क्षेत्राधिकारप्रश्नश्च**
खण्डपीठस्य समक्षम् इदं तथ्यम् आगतं यत् याचिकाकर्त्रा पूर्वम् अपि २०२४ तमे वर्षे केन्द्रीय-विश्वविद्यालयस्य कुलपतेः नियुक्तिं विरुद्ध्य एतादृश्येव याचिका प्रविष्टा आसीत्। तस्मिन् प्रकरणे याचिकाकर्तुः क्षेत्राधिकार-विषये संशयाः उत्थापिताः आसन् तथा च १ मई २०२५ दिनाङ्के सा याचिका निरस्ता अभवत्। उच्चन्यायालयेन टिप्पणी विहिता यत् याचिकाकर्तुः वास्तविक-उद्देश्यस्य परीक्षणार्थम् एतत् परमावश्यकं यत् सः उच्चन्यायालयस्य पञ्जिकायां लक्ष-द्वय-रूप्यकाणि समर्पयेत्।न्यायालयेन याचिकाकर्तुः अन्यराज्यात् (नोएडातः) सम्बद्धतां पूर्व-निरस्त-याचिकायाः स्वरूपं च दृष्ट्वा अस्याः प्रतिभूति-राशेः बन्धनं स्थापितम्। पीठस्य अस्य आदेशस्य अनन्तरं याचिकाकर्तुः अधिवक्त्रा स्व-पक्षकारात् निर्देशावबोधाय किञ्चित् समयं याचितम्। उच्चन्यायालयेन अधिवक्ता-निवेदनं स्वीकृत्य अस्य प्रकरणस्य आगामिनी विचारणा-तिथिः १५ अक्टूबर् २०२६ निर्धारिता।

# स्वमूलराज्येन सह सम्बद्धाः तिष्ठेयुः हिमाचलिनः;

## 'मण्डी-जन-कल्याण-सभायाः' कार्यक्रमे जयरामठाकुरस्य आग्रहः



**हिमसंस्कृतवार्ताः- नवदेहली।**
विधानसभायाः विपक्षनेत्रा पूर्व-मुख्यमन्त्रिणा च जयराम ठाकुरेण प्रवासि-हिमाचली-जनाः स्वमातृभूमिना मूलराज्येन च सह भावात्मक-रूपेण संलग्नाः स्थातुम् आहूताः। शनिवासरे नवदेहल्याः 'शाहसभागारे' 'हिमाचल- मण्डी- जनकल्याण- सभया' आयोजिते 'सायर उत्सवे' जनसमूहं सम्बोधयन् सः अवदत् यत् प्रदेशे प्राकृतिक- आपत्काले एतादृशीभिः सामाजिकसंस्थाभिः श्लाघनीयं कार्यं विहितम्। सः न्यवेदयत् यत् 'कोविड'-विभीषिकाकाले देशस्य विविध-भागेभ्यः प्रायः सार्ध-द्विलक्षं (२.५ लक्षम्) जनाः स्व-मूलराज्यं प्रति न्यवर्तन्त; तस्मिन् विषमे काले प्रवासिजनानां देहल्यां निवास- भोजनादि- व्यवस्थापनम् अतिरिच्य तान् स्व-ग्रामेषु प्रापयितुम् एताभिः संस्थाभिः प्रशंसनीयं कार्यं कृतम् आसीत्।
जयराम-ठाकुरेण गते वर्षे वर्षर्तौ (मानसून-काले) समागतायाः भीषण-प्लावन-विभीषिकायाः काले संस्थायाः सकारात्मक-भूमिका उल्लिखिता। सः प्रोक्तवान् यत् संस्थाभिः तस्य विधानसभा-क्षेत्रस्य दुर्गमभागेषु अनेके शिबिराणि आयोज्य जनेभ्यः साहाय्यं प्रदत्तम्, यदर्थं ते अभिनन्दनार्हाः सन्ति। सुदूर-पर्वतीयक्षेत्रेषु स्वास्थ्यशिबिराणाम् आयोजनाय सङ्घटनस्य प्रशंसां कुर्वन् सः सर्वविध-साहाय्यस्य आश्वासनम् अयच्छत्।

**संस्कृतेः संरक्षकाः, प्रदेशस्य च भवेयुः 'राजदूताः'**
विपक्षनेत्रा प्रवासि-हिमाचलिनः व्यापार-वृत्ति- उद्योगेषु अग्रेसराः भवितुं प्रेरिताः, सहैव हिमाचलं हृदये धारयितुम् आग्रहः कृतः। सः अवदत् यत् हिमाचलिनः स्वसंस्कृतेः, सभ्यतायाः, विशिष्ट- अभिज्ञानस्य च रक्षणं कुर्वन्तः राज्यस्य 'राजदूतवत्' कार्यं कुर्युः, येन समग्रे देशे हिमाचलस्य गौरववृद्धिः भवेत्। सः प्रवासिनां प्रतिभायाः लाभं हिमाचलस्य विकासाय योजयितुं परामर्शम् अददात् तथा च स्व-ऐच्छिककोषात् सभायै एकापञ्चाशत्-सहस्र-रूप्यकाणां (५१,०००) अनुदानं स्वीकृतवान्।

### आरक्षणस्य याचना, सांस्कृतिक-प्रस्तुतिश्च

अस्मिन् अवसरे पूर्व-विधानसभाध्यक्षः कौलसिंहठाकुर-महोदयः अवदत् यत् सः विगत-पञ्चविंशतिवर्षेभ्यः (२५ वर्ष) अनया संस्थया सह सम्बद्धः अस्ति, अस्यां कालावधौ सभा निरन्तरम् उन्नतिमार्गे प्रवृत्ता। तेन उल्लिखितं यत् पूर्ण-राज्यत्व-प्राप्तेः अनन्तरं हिमाचलेन देशस्य मानचित्रपटले स्वस्य सुदृढ-उपस्थितिः स्थापिता। सभायाः अध्यक्षः के. आर. वर्मामहोदयः स्वसम्भाषणे महानगरेषु निवसतं प्रवासि- हिमाचली- जनानां बालकेभ्यः राज्यस्य आयुर्विज्ञान- महाविद्यालयेषु व्यावसायिक- पाठ्यक्रमेषु हिमाचल-छात्रैः सह समानावसर- प्रदानस्य निवेदनम् अकरोत्। सः अवदत् यत् साम्प्रतं प्रवासिनां बालकाः 'बाह्य-छात्रवत्' मन्यन्ते, येन तेषु कुण्ठा उत्पद्यते; अतः तेषां कृते पञ्चप्रतिशतं (५%) आसनानि आरक्षितानि क्रियेरन्।
कार्यक्रमान्ते विविधक्षेत्रेषु उत्कृष्ट-योगदानं दत्तवन्तः हिमाचलिनः सम्मानिताः, पारम्परिक- सांस्कृतिक-कार्यक्रमाश्च सोल्लासं प्रस्तुताः।

# हिमाचले शिक्षकाणां विपुलनियुक्तिः; विद्यालयेषु पूरयिष्यन्ते द्विसहस्रं नूतनपदानि- मुख्यमन्त्री सुक्खू



**हिमसंस्कृतवार्ताः- सोलनम्।**
सोलनमण्डलस्य अर्की-विधानसभाक्षेत्रस्य प्रवासकाले मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः उद्घोषितवान् यत् आगामिषु त्रिषु मासेषु केन्द्रीय- माध्यमिक- शिक्षा- बोर्डसम्बद्धेषु विद्यालयेषु शिक्षकाणां द्विसहस्रं (२०००) नूतनाः नियुक्तयः भविष्यन्ति। एतेषु विद्यालयेषु सर्वकारः कस्यापि अनुशंसाम् अनादृत्य केवलं योग्यतायाः आधारेण एव शिक्षकान् नियोजयिष्यति। सः अवदत् यत् राज्य-सर्वकारः शिक्षा-स्वास्थ्यक्षेत्रेषु बृहत्- परिवर्तनानि कर्तुं सज्जः अस्ति, येषां प्रभावं जनाः आगामि-काले साक्षात् अनुभविष्यन्ति।अपरत्र मुख्यमन्त्री आगामिषु दिनेषु सिरमौर- मण्डी- मण्डलयोः प्रवासं विधास्यति। प्राप्त- विवरणानुसारं सः २३ सितम्बरदिनाङ्के सिरमौरमण्डलस्य पच्छाद-विधानसभा-क्षेत्रस्य यात्रां कर्तुं शक्नोति, यत्रैव २६ सितम्बर-दिनाङ्के मण्डी-मण्डलस्य बल्ह-विधानसभा-क्षेत्रेऽपि तस्य प्रवास-कार्यक्रमः विरच्यते।

### हिमुडा-संस्थायां उद्वेलनम्, मुख्य-कार्यकारी- अधिकारिणः पदे विवादः

हिमाचलप्रदेश- नगर- एवं- ग्राम- नियोजन-गृहनिर्माण- प्राधिकरणात् मुख्य- कार्यकारी-अधिकारिणः पदनियुक्तिं लक्ष्यीकृत्य उच्चन्यायालयस्य निर्णयात् परं महत् संक्षोभः समुत्पन्नः अस्ति। उच्चन्यायालयेन 'सुरिन्दर कुमारः विरुद्धम् अञ्जोरी कपूरः' इति अभियोगे निर्णयः अञ्जोरीकपूर महोदयायाः पक्षे प्रदत्तः आसीत्। अस्मिन् विषये अद्यापि राज्यसर्वकारस्य पक्षतः औपचारिकः नियुक्ति-आदेशः न निर्गतः आसीत्, किन्तु अञ्जोरी कपूर महोदयया अस्मिन् पदे पदभारः गृहीत्वा कार्यं समारब्धम्। तया सर्वकाराय स्व-पदभारग्रहण-वृत्तं प्रेषितम्, यत् अद्यावधि सर्वकारेण न स्वीकृतम्। चर्चा अस्ति यत् उच्चन्यायालयस्य इमं निर्णयं राज्य-सर्वकारस्य पक्षतः उच्चतर-न्यायापीठे पुनः आह्वातुं शक्यते।

## जापान-देशे विंशतितमस्य एशियायी-क्रीडा-महोत्सवस्य औपचारिक-समारम्भो जातः

जापान-देशस्य मिज़ुहो-पार्क-एथलेटिक्स-क्रीडाङ्गणे विंशतितमस्य एशियायी-क्रीडा-महोत्सवस्य औपचारिक-समारम्भः जातः। सम्राजा नारुहितो-महाभागेन क्रीडा-महोत्सवस्य उद्घाटनं समुद्घोषितम्। द्विघण्टात्मके अस्मिन् भव्य-उद्घाटन-समारोहे जापान-राजपरिवारस्य सदस्याः, क्रीडाधिकारिणः, अथ च एशियायी-ओलम्पिक-परिषदः अध्यक्षः शेख-जोआन-बिन-हमद-अल-थानी इत्येते समुपस्थिताः आसन्। क्रीडकानां शोभायात्रायां भारतस्य एकाधिक पञ्चशत-सदस्यीयस्य विशाल-दलस्य नेतृत्वं द्विवारं ओलम्पिक-पदक विजेत्र्या मनु-भाकर इत्यनया अथ च कबड्डी-क्रीडकेन पवन-सेहरावतेन कृतम्।

## महिला-क्रिकेट्-प्रतियोगितायां भारतेन जापान-देशं अष्टस्तोभैः पराजित्य पूर्वमेव उपान्त्य-चक्रे स्थानं विजितम्

महिला-क्रिकेट्-प्रतियोगितायां भारतेन जापान-देशं अष्टस्तोभैः पराजित्य पूर्वमेव उपान्त्य-चक्रे स्थानं विजितम्। अद्य जापानस्य निश्शिन-नगरे द्वितीये उपान्त्य-चक्रे भारतस्य प्रतिद्वन्द्विता बाङ्गलादेशेन सह भविष्यति ।

# सकारात्मकशक्त्यैव शैक्षिक-वातावरणस्य निर्माणम्- "डॉ. शैलपुत्री"



हिमसंस्कृतवार्ताः- कुलदीपमैन्दोला
श्रीनगरस्थे हेमवतीनन्दनबहुगुणा- गढवाल-विश्वविद्यालयस्य सीनेटसभागारे १८ सितम्बर २०२६ तमे दिने छात्रपरामर्शसमितेः, नवनिर्वाचित-छात्रसङ्घ- पदाधिकरिणां प्रतिनिधीनां च मध्ये संवादात्मकगोष्ठ्याः आयोजनम् अभवत्। अस्याः संगोष्ठ्याः मुख्योद्देश्यः नवनिर्वाचितप्रतिनिधीनां स्वागतं, तेषां विचाराणां प्राधान्यानां च श्रवणं तथा विश्वविद्यालयस्य शैक्षिकवातावरणे, छात्रकल्याणे, आधारभूतसौविध्येषु विद्यार्थिसम्बद्धसमस्यासु च विमर्शः आसीत्।
कार्यक्रमस्य प्रारम्भे डॉ. कविता भट्टवर्या, उपछात्रपरामर्शदात्री, नवनिर्वाचितप्रतिनिधीनां स्वागतं कृत्वा निर्वाचनसफलतायै शुभकामनाः प्रदत्तवती। तया उक्तं यत् छात्रसङ्घस्य सक्रियः सकारात्मकः रचनात्मकश्च सहभागः विश्वविद्यालयस्य उन्नतौ महत्त्वपूर्णं योगदानं दास्यति। छात्रपरामर्शसमितिः छात्राणां प्रशासनस्य च मध्ये सुदृढः संवादसेतुरिति अपि प्रतिपादितम्।
प्रो. ममता राणा, संयुक्तछात्रपरामर्शदात्री (टिहरीपरिसरतः), छात्रप्रतिनिधीन् विश्वविद्यालयस्य चुनौतीनां समाधानार्थं सामूहिकरचनात्मकप्रयत्नान् कर्तुं प्रेरितवती। तया नियमितकक्षोपस्थितेः, सकारात्मकशैक्षिकवातावरणस्य, विश्वविद्यालयस्य शैक्षिकपरिचयस्य सुदृढीकरणस्य आवश्यकता प्रतिपादिता। संगोष्ठ्यां छात्रसङ्घाध्यक्षः हिमांशुभण्डारी सहितं प्रतिनिधिभिः बहवः महत्त्वपूर्णाः विषयाः प्रस्तुताः। तेषु उत्तमस्थानप्राप्तिसौविध्यं, सेवावसरोन्मुखकार्यक्रमाः, स्वास्थ्यधनलाभसंस्थाः, शोधार्थिनां परिवहनसौविध्यं, स्मार्तकक्षाः, प्रयोगशालासु उपकरणरसायनानां उपलब्धता, स्वास्थ्यकेन्द्रे नियमितवैद्यव्यवस्था, राष्ट्रीयशिक्षा नीतिः– २०२० अनुरूपनवीनग्रन्थानां पुस्तकालये समावेशः प्रमुखाः आसन्। तदतिरिक्तं छात्रावासेषु स्वच्छता, शुद्धपेयजलम्, आधारभूतसुविधानां सुधारः, आईटैपविद्यार्थिनां पर्याप्तकक्षाः, नियमिताध्यापकव्यवस्था, लैङ्गिकसमानता, अकादमिक- सांस्कृतिकक्लबानां सञ्चालनम्, कौशलविकासकार्यशालाः, यू.पी.एस.सी. मार्गदर्शनसुविधा इत्यादिषु विषयेष्वपि सार्थकः विचारविमर्शः अभवत्। प्रो. सीमा धवनः, संयुक्तछात्रपरामर्शदात्री, विद्यार्थिनां समस्याश्रवणस्य प्रभावीसंवादस्य संस्थागतसहयोगस्य च महत्त्वम् अवदत्। तया उक्तं यत् समस्याणां समाधानार्थं रचनात्मकसुझावाः अपि अपेक्षिताः। छात्रपरामर्शसमितेः भूमिका पौड़ी- टिहरीपरिसरयोः अपि विस्तरिष्यते इति स्पष्टं कृतम्। प्रो. एम. एम. सेमवालः, मुख्यच्छात्रपरामर्शदाता, नवनिर्वाचितप्रतिनिधीन् अभिनन्द्य लोकतान्त्रिकमूल्यानां, संवादस्य, धैर्यस्य उत्तरदायित्वपूर्णप्रतिनिधित्वस्य च महत्त्वं निरूपितवान्। तेन छात्रसङ्घः विश्वविद्यालयस्य सकारात्मकशैक्षिकसंस्कृतेः संवर्धने सहयोगं कर्तुम् आहूतः। विद्यार्थिभिः प्रस्तुतविषयाणां प्रभावी-अनुवर्ती- कार्यवाह्यर्थं पञ्चदशदिनानाम् अन्तरे विभागाध्यक्षैः निदेशकमहाभागैः सह पुनः संगोष्ठ्याः आयोजनस्य प्रस्तावः स्वीकृतः। तस्यां विभागैः कृतकार्याणां समीक्षा, लम्बितप्रकरणानां स्थितिः, विद्यार्थिभ्यः प्रतिपुष्टिप्रदानम् इत्यादिविषयाः चर्चायाः केन्द्रे भविष्यन्ति।
अन्ते डॉ. अमरजीतसिंहपरिहारः सर्वेभ्यः छात्रप्रतिनिधिभ्यः उपस्थितसदस्येभ्यश्च धन्यवादं ज्ञापितवान्। तेन उक्तं यत् विद्यार्थिनां सर्वे विषयाः संस्थागतप्रक्रियया सम्बन्धिताधिकारिभ्यः प्रेषयिष्यन्ते, समाधानदिशि आवश्यकप्रयत्नाः करिष्यन्ते। संगोष्ठ्याः समापनं सकारात्मक-संवादस्य, पारस्परिकसहयोगस्य तथा छात्रहिताय सामूहिकरूपेण कार्यकरणस्य दृढसंकल्पेन अभवत्।

# महावीर-मन्दिरं सम्प्राप्ता 'वन्' चलच्चित्रस्य कलाकाराः
## दुःखहरण-हनुमतः चरणकमलयोः प्रणिपत्य याचितः शुभाशीर्वादः



**निर्मात्री एकता कपूरः, अभिनेत्री तमन्ना भाटिया, अभिनेता सिद्धार्थ मल्होत्रा च सहकर्मीभिः सह मन्दिरे चक्रुः विशेष-पूजनम्**

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

बिहटाक्षेत्रस्य 'वन-देवी' विषयिक्याः लोकश्रद्धायाः आधारेण निर्मितायाः 'वन्' इत्याख्यायाः चलच्चित्रकृतेः वृन्दानुगाः शनिवासरे सन्ध्या-काले पाटलीपुत्र- धूमशकटस्थानकस्थे (पटना जंक्शन) सुप्रसिद्धे महावीरमन्दिरे दर्शनार्थं सम्प्राप्ताः। चलच्चित्रनिर्मात्री एकता कपूरः, लब्धप्रतिष्ठा अभिनेत्री तमन्ना भाटिया, अभिनेता सिद्धार्थ मल्होत्रा च समभिव्याप्य अभिनयकलाकारैः दलस्य सदस्यैश्च परमया श्रद्धया सह मन्दिरे देव-पूजनम् अर्चा च विहिता।

महावीर-मन्दिरे 'दुःखहरण-हनुमान्' इति नाम्ना विश्रुतस्य पवनसुतस्य वज्राङ्गिनः चरणयोः सर्वेऽपि प्रणताः सन्तः मस्तकं न्यवेदयन्, शुभाशीर्वादञ्च जगृहुः। दलस्य सर्वे सदस्याः मन्दिराभ्यन्तरे प्रचुरं समयं यापयन्तः कार्य-सिद्धये मङ्गलाशां चक्रुः। बिहारस्य धार्मिकायां सांस्कृतिकायां च चेतनायां मूर्धन्यं स्थानं धारयति अस्मिन् पावन-मन्दिरे चलच्चित्र-कलाकाराणाम् उपस्थितिः समागतानां भक्तानां कृतेऽपि महद् आकर्षणकेन्द्रम् अभवत्।

पूजा-विध्यनन्तरं चलच्चित्रदलेन मन्दिरपरिसरे स्थितायाम् आचार्यस्य किशोरकुणालमहोदयस्य प्रतिमायां पुष्पहारं समर्प्य तं प्रति भावपूर्णा श्रद्धाञ्जलिः समर्पिता। अस्मिन् मङ्गलावसरे 'श्रीमहावीर- स्थान- न्यास- समित्याः' सचिवेन सायण कुणालेन एकता कपूरायै, तमन्ना भाटियायै, सिद्धार्थ मल्होत्राय च महावीरमन्दिरस्य विशिष्टा सचित्रग्रन्थावली समुपहृता। मन्दिरप्रशासनस्य पक्षतः दलस्य सर्वेभ्यः सदस्येभ्यः पावनम् उपोषणवस्त्रं (रामनवमी-रामनामा) च समर्पितम्।

चलच्चित्रजगतः लब्धवर्णानां मुखानां महावीरमन्दिरे आगमनं न केवलम् एका धार्मिका यात्रा, अपि तु बिहारस्य लोक-श्रद्धायाः, संस्कृतेः, चलच्चित्र-जगतश्च मध्ये विरचितस्य एकस्य सौहार्दपूर्णसेतोः अनुपमं दृश्यम् आसीत्। दुःखहरणहनुमतः चरणकमलेषु शिरो विनम्य 'वन' चलच्चित्रस्य वृन्देन स्वकीयाय आगामिप्रकल्पाय मङ्गलाशीः सम्प्राप्ता।



## बस्तीमण्डले शिक्षकनिर्वाचनक्षेत्रस्य पदाधिकारिणां सभा सम्पन्ना

हिमसंस्कृतवार्ताः- बस्ती।

गोरखपुर- फैजाबाद- खण्डशिक्षकनिर्वाचनक्षेत्रस्य बस्तीमण्डलसम्बद्धानां सर्वेषां पदाधिकारिणां महत्त्वपूर्णा सभा निर्वाचनप्रभारी ज्योतिषपाण्डेयवर्यस्य अध्यक्षतायां सम्पन्ना अभवत्। सभायां शिक्षकनिर्वाचनक्षेत्रस्य प्रत्याशी डॉ. राकेशसिंहः विशेषरूपेण उपस्थितः आसीत्। सभायां संगठनस्य भावीकार्यक्रमाणां, निर्वाचनस्य सज्जतायाः, शिक्षकहितसम्बद्धानां विविधविषयाणां च विषये विस्तृतः विचारविमर्शः अभवत्। संगठनस्य सुदृढीकरणाय, शिक्षकाणां हितसंरक्षणाय सर्वैः पदाधिकारिभिः सक्रियतया कार्यकरणस्य संकल्पः कृतः। अवसरेऽस्मिन् प्रदेशोपाध्यक्षः मारकण्डेयसिंहः, प्रदेशमहामन्त्री अनिरुद्धत्रिपाठी, प्रदेशमन्त्री सञ्जयद्विवेदी, मण्डलाध्यक्षः गुलाबचन्दमौर्यः, मण्डलमन्त्री अरुणकुमारमिश्रः, सन्तकबीरनगर- जनपदाध्यक्षः महेशरामः, बस्तीजनपदाध्यक्षः अजयप्रतापसिंहः, बस्तीजनपदमन्त्री डॉ. बेचनयादवः, सिद्धार्थनगरजनपदमन्त्री रामविलासचौधरी, सन्तोषपाण्डेयः इत्यादयः अनेके पदाधिकारिणः उपस्थिताः आसन्।

सभायाः अन्ते संगठनस्य एकता, शिक्षकहितस्य संरक्षणं तथा निर्वाचनकार्यस्य सफलतां प्रति सर्वेषां पदाधिकारिणां समन्वितप्रयत्नस्य आवश्यकता प्रतिपादिता।

# दिल्लीविश्वविद्यालये छात्रसंघनिर्वाचने एबीवीपीसंघटनस्य उल्लेखनीयः विजयः



**हिमसंस्कृतवार्ताः- डॉ विमलेश झा, नवदिल्ली।**

दिल्लीविश्वविद्यालयस्य छात्रसंघनिर्वाचने अखिलभारतीय- विद्यार्थीपरिषदः (ABVP) उल्लेखनीयः विजयः अभवत्। एबीवीपीसंघटनस्य अभ्यर्थिनः अध्यक्ष- सचिव- संयुक्तसचिवपदानि विजित्य छात्रसंघे स्वप्रभुत्वं स्थापितवन्तः। उपाध्यक्षपदे तु स्वतन्त्रः प्रत्याशी दीपांशु शौकीनः विजयं प्राप्तवान्। अध्यक्षपदस्य निर्वाचनस्य परिणामे एबीवीपी-अभ्यर्थी यशः डबासः २४,५७६ मतानि प्राप्य विजयी अभवत्। सः भारतीय- राष्ट्रीय- छात्रसङ्घस्य अभ्यर्थिनं विजयशङ्करमीणाम् २,०५३ मतानाम् अन्तरालेन पराजितवान्। मतगणनायाः प्रारम्भिकचरणे विजयशङ्करमीणः अग्रे आसीत्, किन्तु अन्ततः यशः डबासः विजयम् अवाप्तवान्। अध्यक्षपदस्य निर्वाचनं द्वयोः प्रमुखाभ्यर्थिनोः मध्ये अत्यन्तं स्पर्धात्मकम् आसीत्। उपाध्यक्षपदे स्वतन्त्राभ्यर्थी दीपांशुः शौकीनः ३०,६३४ मतानि प्राप्य विजयम् अवाप्तवान्। विजयप्राप्तेः अनन्तरं सः उक्तवान् यत् विश्वविद्यालयस्य छात्राणां हिताय आरब्धः तस्य सङ्घर्षः निरन्तरं प्रवर्तिष्यते। सः छात्राणां स्वरं भविष्यति, तेषाम् अधिकाराणां च कृते निरन्तरं सङ्घर्षं करिष्यति। छात्रेषु यत्र कुत्रापि अन्यायः भविष्यति, तत्र सः प्रथमं उपस्थितः भूत्वा तेषां पक्षे स्वरं मुखरयिष्यति इति सः अवदत्।

अध्यक्षपदविजयानन्तरं यश डबासः उक्तवान् यत् एषः विजयः छात्राणां विजयः, सद्भावस्य विजयः तथा च तेषां विजयः अस्ति, ये छात्राः विगतेषु वर्षेषु विभिन्नेषु कार्येषु तैः सह सहयोगं कृतवन्तः। सः छात्रेषु स्वस्य विश्वासं प्रदर्शितवन्तः सर्वेभ्यः धन्यवादं ज्ञापितवान्। छात्राणां समस्यासु तेषां मध्ये स्थित्वा तेषां कृते संघर्षं कर्तुं प्रतिज्ञां कृतवान्। यशः डबासस्य अनुसारं तस्य प्रमुखप्राथमिकता छात्रावासानां, निजी- आवासीय- गृहाणां सुरक्षापरीक्षणं करणम् अस्ति। छात्राणां सुरक्षां सुनिश्चितं कर्तुं, सत्यनिकेतनसदृशाः घटनाः पुनः न भवन्तु इति सुनिश्चितं कर्तुं प्रयासः भविष्यति इति सः उक्तवान्। सचिवपदे एबीवीपी- अभ्यर्थिनी रिया छावडी विजयं प्राप्तवती। विजयस्य अनन्तरं सा उक्तवती यत् छात्राणां, विशेषतः बालिकानां, सुरक्षा तस्याः प्रमुखप्राथमिकता अस्ति। विश्वविद्यालयस्य प्रत्येकां छात्रां सुरक्षिततत्वस्य अनुभवं भवेत् इति सुनिश्चितं कर्तुं सा प्रयतिष्यते। घोषणापत्रे उल्लिखिताः विषयाः तस्याः सङ्घटनस्य प्रतिबद्धताः सन्ति तथा च तेषां पूर्तये सा यथाशक्ति प्रयत्नं करिष्यति इति सा अवदत्। एवं च यत्र दिल्लीविश्वविद्यालयस्य छात्रसंघनिर्वाचने अध्यक्ष, सचिव तथा संयुक्तसचिवपदेषु एबीवीपी-संघटनस्य विजयः अभवत्, तत्र एव उपाध्यक्षपदं स्वतन्त्राभ्यर्थिना प्राप्तम्। निर्वाचनपरिणामेन विश्वविद्यालयस्य छात्रराजनीतौ नूतनं नेतृत्वं स्थापितम् अभवत्।

# महामहोपाध्याय आचार्य डॉ. जयमन्तमिश्रस्य जन्मशतवार्षिकीसमारोहः सम्पन्नः





**मधुबनी हिमसंस्कृतवार्ताः - डॉ. विमलेश झा**
बिहारराज्यस्य मधुबनीजनपदस्य कलुआही-प्रखण्डान्तर्गतस्य हरिपुरग्रामे स्थिते जनकनन्दिनी-संस्कृत- महाविद्यालयस्य परिसरे जनकनन्दिनी-संस्कृत- गुरुकुलन्यासस्य तत्त्वावधानेन महामहोपाध्यायाचार्यस्य डॉ. जयमन्तमिश्रस्य जन्मशतवार्षिकीसमारोहः, पुस्तकालयस्य उद्घाटनसमारोहः, पण्डितसम्मानसमारोहः तथा विचारगोष्ठी च भव्यतया आयोजिताः। कार्यक्रमस्य शुभारम्भः स्वागतसमारोहेण, कुलगीतेन, गोसाउनीगीतेन च अभवत्। पण्डितदिवाकरझा- गोविन्दझामहोदयोः स्वस्तिवाचनेन कार्यक्रमे आध्यात्मिकं वातावरणं निर्मितम्। अस्मिन् अवसरे महामहोपाध्यायाचार्यडॉ. जयमन्तमिश्रस्य नाम्ना नूतनस्य 'आचार्य डॉ. जयमन्तमिश्रपुस्तकालयस्य' भव्यः शुभारम्भः अपि कृतः। कार्यक्रमस्य उद्घाटनकर्ता कामेश्वरसिंह- दरभङ्गा- संस्कृत-विश्वविद्यालयस्य, दरभङ्गायाः पूर्वकुलपतिः प्रो. शशिनाथझामहोदयः आसीत्। मुख्यातिथिरूपेण बिहारसर्वकारस्य उच्चशिक्षाविभागस्य पूर्वनिदेशकः डॉ. श्यामनारायणकुमारः, निवर्तमानः राज्य- सूचना- विज्ञानाधिकारी अजयपाठकः, शिक्षाविद् समाजसेवी च प्रतापनारायणकुमरः च उपस्थिताः आसन्। उद्घाटनकर्ता प्रो. शशिनाथझामहाशयः महामहोपाध्यायाचार्यस्य डॉ. जयमन्तमिश्रस्य कृतित्वं व्यक्तित्वं च स्मरन् तस्य ज्ञाननिष्ठां, संस्कारसम्पन्नतां, समाजसेवां सांस्कृतिकचेतनां च विशेषतया रेखाङ्कितवान्। तेन उक्तं यत् आचार्यस्य जीवनं समाजाय संस्कृतक्षेत्राय च प्रेरणास्रोतः अस्ति। शिक्षाविद् समाजसेवी च प्रतापनारायणकुमरेण उक्तं यत् नूतनसन्ततिः आचार्यस्य डॉ. जयमन्तमिश्रस्य व्यक्तित्वात् प्रेरणां गृह्णीयात्। संस्कृत्या एव संस्कारः सम्भवति। अतः संस्कृतभाषायाः संरक्षणाय संवर्धनाय च विशेषः प्रयासः करणीयः। वयं स्वकीयमूलपरम्परां विस्मृतवन्तः, अतः पुनः स्वसंस्कृतेः संस्कृतभाषायाश्च समीपं गन्तव्यम् इति तेन प्रतिपादितम्। निवर्तमानः राज्य- सूचना- विज्ञानाधिकारी बिहारः अजयपाठकः कार्यक्रमं सम्बोधयन् अवदत्- "डॉ. जयमन्तमिश्रस्य परिचयं दातुं सूर्याय दीपं दर्शयितुमिव भवति।" तेन गुरुकुलपरम्परायाः आवश्यकता, संस्कृतशिक्षायाः महत्त्वं, ज्ञान-संस्कार-समाजसेवासम्बद्धानां परम्पराणां संरक्षणं च विशेषतया प्रतिपादितम्। कलुआही उच्चविद्यालयस्य प्रधानाध्यापकः सत्येन्द्रझावर्यः कार्यक्रमे स्वकीयस्य पूर्णसहयोगस्य आश्वासनं प्रदत्तवान्। मुख्यातिथिः बिहारसर्वकारस्य उच्चशिक्षाविभागस्य पूर्वनिदेशकः डॉ. श्यामनारायणकुमरः पुस्तकालयस्य महत्त्वं प्रतिपादयन् अवदत्- "एकं पुस्तकालयं उद्घाटयेत्, एकं कारागारं च पिधीयते।" तेन उक्तं यत् यदि सः दरभङ्गा- स्नातक- निर्वाचनक्षेत्रस्य विधानपरिषद्-निर्वाचने विजयं प्राप्स्यति, तर्हि अस्य संस्कृत-महाविद्यालयस्य सर्वाः आवश्यकताः पूरयितुं प्रयत्नं करिष्यति। समारोहे महामहोपाध्यायाचार्यडॉ. जयमन्तमिश्रस्य जीवनं, कृतित्वं व्यक्तित्वं च स्मरन्तः विद्वांसः संस्कृतशिक्षायाः, पुस्तकालयस्य, गुरुकुलपरम्परायाः च महत्त्वे विस्तरेण विचारान् प्रस्तुतवन्तः। पण्डितसम्मानसमारोहे विदुषां सम्मानं कृतम्। विचारगोष्ठ्यां संस्कृतभाषायाः संरक्षणं, संवर्धनं प्रचारश्च तथा भारतीयसंस्कृतेः मूल्यानां नूतनसन्ततिं प्रति संप्रेषणस्य आवश्यकता विशेषतया प्रतिपादिता। सम्पूर्णः कार्यक्रमः संस्कृतभाषायाः, भारतीय- ज्ञान- परम्परायाः, गुरुकुल- व्यवस्थायाः, संस्कारप्रधानशिक्षायाः संरक्षण- संवर्धनस्य सन्देशं दत्वा सफलतया सम्पन्नः अभवत्।

# भूमि-स्वीकरण-प्रकल्पेषु क्षिप्रतायै निदेशः

## अयः पथाधिकारिणाम् अनुपस्थितौ राजस्वमन्त्रिणा प्रदर्शिता अप्रसन्नता



**हिमसंस्कृतवार्ताः:- राघवनाथ झा, पाटलिपुत्रम्।**
राजस्व-भूमिसुधारमन्त्री डॉ. दिलीपकुमार जायसवालः भृगुवासरे शास्त्रीनगरस्थे राजस्व-सर्वेक्षण- प्रशिक्षणसंस्थाने राज्ये प्रवर्त्यमानानां विविधानां भूमि-स्वीकरणप्रकल्पानां प्रगतेः गम्भीरां समीक्षां विहितवान्। समीक्षासंसदि अयःपथ- विभागस्य (रेल) कस्यापि स्थानिक-पदाधिकारिणः अनुपस्थितौ मन्त्री तीव्राम् अप्रसन्नतां प्राकटयत्, तथा च भूमि- स्वीकरण-निदेशकं प्रति एतत्सन्दर्भे स्थानिक-महाप्रबन्धकाय अयःपथ-मण्डलाय (रेलबोर्ड) च पत्र-प्रेषणाय आदिष्टवान्। मन्त्री मण्डलशः प्रकल्पानां समीक्षां कुर्वन् भूमि- स्वीकरण-प्रक्रियासु गतिशीलताम् आनेतुं, निरर्थकं विलम्बं दूरीकर्तुं च बलं दत्तवान्। तेनादिष्टं यत् सूचना-पत्रस्य प्रेषणस्य चतुर्दश-दिनानन्तरं सम्बद्धाय पक्षाय स्मारिकापत्रम् अवश्यमेव प्रेषणीयम्, येन प्रक्रिया लम्बिता न तिष्ठेत्। न्यायालये विचारधीनानां विवादानाम् अद्यतनस्थितेः परिज्ञानं निदेशालयाय प्रदातव्यम्, तथा च विधिप्रकोष्ठस्य साहाय्येन विवादानाम् अध्ययनं विधाय आवश्यकाः मार्गदर्शकाः निर्देशाः प्रसारणीयाः इत्यपि तेनोक्तम्। डॉ. जायसवालः प्रोवाच यत् भूमिस्वीकरणं विकास-प्रकल्पानां सम्पादने महती शृङ्खला वर्तते। मार्गेभ्यः, अयःपथेभ्यः, औद्योगिकक्षेत्रेभ्यः, अन्याभ्यश्च आधारभूत-संरचनाभ्यः भूमेः उपलब्धीकरणप्रक्रियायां समयबद्धता परमावश्यकी। अधिकारिणां सक्रियतया उत्तरदायित्वभावेन चैव प्रकल्पाः निर्धारितसमये पूर्णतां लब्धुं शक्नुवन्ति। पीएमजी, अयःपथः, राष्ट्रिय- राजमार्ग-प्राधिकरणम्, औद्योगिकक्षेत्राणां च कृता समीक्षा उपवेशने विभागीय-सचिवः जयसिंहः प्रकल्पानां वर्गशः समीक्षणम् अकरोत्। 'पीएमजी'-अन्तर्गते सारण- सीवान- पूर्वचम्पारण- पश्चिमचम्पारण-भोजपुर- मण्डलानां प्रकल्पानां स्थितिः अवगता। तदनन्तरम् अयःपथ-सम्बद्धानां तथा च राष्ट्रिय-राजमार्ग- प्राधिकरण (NHAI) सम्बद्धानां भूमि-स्वीकरण- प्रकरणानां प्रगतेः मूल्याङ्कनं सञ्जातम्। उद्योगविभागेन चतुर्विंशति (२४) मण्डलेषु प्रस्तावित-औद्योगिकक्षेत्रेभ्यः प्रचलन्त्याः भूमि- स्वीकरण-प्रक्रियायाः अपि मण्डलशः समीक्षा विहिता। सचिवेन अधिकारिणः निर्दिष्टाः यत् भूमि- स्वीकरणकाले सम्बद्धाः भूस्वामिनः स्वकीयायाः पञ्जीकरणपुस्तिकायाः नवीकरणाय अद्यतनीकरणाय च प्रेरणीयाः, येन भू-अभिलेखानि सुव्यवस्थितानि त्रुटिरहितानि च भवेयुः। अपरत्र, भूमि- स्वीकरणनिदेशकः कमलेशकुमारसिंहः सर्वान् मण्डल- भूमि- स्वीकरण- पदाधिकारिणः स्व-स्व- कार्यालयीयानाम् अभिलेखानाम् अङ्कीकरणं (डिजिटलीकरणम्) दशम्-अक्तूबर- दिनाङ्काभ्यन्तरे सम्पूर्णं कर्तुम् आदिष्टवान्।

# लनामिवि-दरभङ्गायाः राष्ट्रिय- सेवा- योजना- प्रकोष्ठेन बिहार- राज्य- आपद्- प्रबन्धन- प्राधिकरण- पाटलिपुत्रस्य सौजन्येन सञ्चालितं 'युव-आपन्मित्र-प्रशिक्षणम्' चतुर्थे दिवसेऽपि निरन्तरम्

## द्विशतं (२००) स्वयंसेवकान् चतुर्षु वर्गेषु संविभज्य 'सीपीआर्' (हृद्-फुप्फुस- पुनरुज्जीवनम्), रुधिर-स्रावनिरोधः, काष्ठ- पट्टिका-बन्धनं, क्षतविक्षतानाम् उत्थापनं वहनञ्च, शारीरिक-परीक्षणञ्चेत्यादीनां कारितः प्रायोगिकः अभ्यासः




**हिमसंस्कृतवार्ताः- राघव नाथ झा, दरभङ्गा।**
ललितनारायण- मिथिला- विश्वविद्यालयस्य राष्ट्रिय- सेवा- योजना- प्रकोष्ठेन बिहार- राज्य- आपद्- प्रबन्धन- प्राधिकरण- पाटलीपुत्रस्य सौजन्येन विश्वविद्यालयपरिसरस्थे जुबिली-सभागारे तत्समीपवर्तिषु क्रीडाङ्गणेषु च समायोज्यमानं द्वारभङ्गा- मधुबनी- समस्तीपुर-मण्डलेभ्यः समागतानां द्विशत-स्वयंसेवकानां (२००) सप्तदिवसीयम् 'आवासीय- युव-आपन्मित्र- प्रशिक्षणशिबिरं' चतुर्थे दिवसेऽपि साटोपं सम्प्रवृत्तम्। अस्मिन् कार्यक्रमे संयोजकः डा. आर. एन. चौरसिया, स्नातकोत्तरविभागस्य कार्यक्रमपदाधिकारी डॉ. सोनूरामशङ्करः, लूटनझा महाविद्यालयः, ननौर (मधुबनी) इत्यस्य रासेयो-पदाधिकारी डॉ. दिलीपकुमारझा, मणिकान्तठाकुरः, मुकेशकुमारझा, अक्षयकुमारझा, समरेशकुमारः, अमितकुमारझा, विकासकुमारः, प्रशान्तकुमारः, सुमितकुमारः, रवीन्द्रकुमारसिंहप्रभृतयः कर्मठाः विद्वांसः स्वकीयं सक्रियं योगदानम् अकुर्वन्।
अस्मिन् मङ्गलावसरे 'एसडीआरएफ' बिहटा, पाटलीपुत्रस्य कुशलाः प्रशिक्षकाः- रूपेशकुमार पासवानः, पङ्कजकुमारः, राजुकुमारः, सन्तोषकुमारः, प्रभुकुमारः, सच्चिदानन्दकुमारः, मिथिलेशतिवारी, पूजाकुमारी, प्रीतुकुमारी च समेत्य स्वयंसेवकेभ्यः विशिष्टं प्राविधिक-प्रशिक्षणं प्राददुः। शिबिरस्य मङ्गलप्रारम्भः राष्ट्रगीतेन रासेयो लक्ष्यगीतेन च, समापनञ्च राष्ट्रगानेन समभवत्। तत्रैव प्रातःकाले शारीरिक-व्यायामेन, योगेन, प्राणायामेन च सह स्वयंसेवकेभ्यः आपद्-परिधानानि, धावन-पादत्राणानि (ट्रैक-शूज), रज्जूः (रस्सी), व्यायामवस्त्राणि (ट्रैक-सूट) च समर्पितानि।

**प्रथमसत्रे वह्नि-दुर्घटनायाः निवारण-प्रक्रिया**
प्रशिक्षणस्य प्रथमे सत्रे रूपेशकुमारपासवानेन वह्निप्रकोपानां घटनाः तन्निवारणाय च प्रवृत्तस्य 'मॉक-ड्रिल' इत्यस्य सविस्तरं ज्ञानं दत्तम्। तेनोक्तं यद् वह्नि-प्रज्वलनस्य प्रमुखेषु हेतुषु मानवीया प्रमादशीलता, वाष्पनिस्रावः, वैद्युतिक-त्रुटयश्च प्रमुखाः सन्ति। एतेभ्यः रक्षणाय वह्निसूचक-घण्टा, अग्निशमनयन्त्राणि, सुरक्षिता वैद्युतिक-तन्त्रीव्यवस्था, जनजागरूकता च परमावश्यकी। तेन वह्नेः स्वरूपं, तस्य प्रज्वलन-प्रक्रिया, तज्जनितः प्रभावः, तस्य ह्रासोपायाश्च विस्तरेण विवृताः। वह्नये इन्धनम्, प्राणवायुः (ऑक्सीजन), उष्णता च त्रयः मुख्याः कारकाः वर्तन्ते; एतेषु कस्यचिद् एकस्य अपसारणेन वह्निः उपशाम्यति। तेन शरीराङ्गानां दग्धतायां सत्यां प्राथमिकोपचारं विधाय सत्वरं वैद्यालयं गन्तव्यम् इति संसूचितम्। यदि च वस्त्रेषु वह्निः संलगेत्, तर्हि 'तिष्ठ, पत, लुठ च' इति नीतेः अनुसरणं कर्तव्यम्।

### मार्गदुर्घटनाः तन्निवारणोपायाश्च

अग्रिमसत्रे प्रशिक्षकेन सन्तोषकुमारेण मार्गदुर्घटनानां विषये प्रोक्तं यद् इयं मानवनिर्मिता विभीषिका वर्तते, यत्र जनाः क्षतविक्षताः भवन्ति कालकवलिताश्च सम्पद्यन्ते। तेन मार्गेषु स्थापितानां सीमास्तम्भानां (माइल-स्टोन) विविधाः वर्णाः तेषामर्थाश्च स्पष्टीकृताः।
तेन प्रतिपादितं यद् यदि पथि-गच्छन्तः पथिकाः दुर्घटनाग्रस्तान् प्राणिनः 'स्वर्ण-होरायाः' प्रथमायाः एक-होरायाः) अभ्यन्तरे चिकित्सालयं प्रापयेयुः, तर्हि पञ्चाशत्-प्रतिशतं (५०%) यावत् अकालमृत्युः वारयितुं शक्यते। तेनोक्तं यद् दत्तांश-प्रमाणानुसारेण पञ्चनवत्यधिक-शत-(१९५)-देशेषु मार्गदुर्घटनादृष्ट्या भारतं प्रथमे स्थाने तिष्ठति। समग्रविश्वस्य दशप्रतिशतं (१०%) मार्गदुर्घटनाः भारते एव भवन्ति, यासु अष्टादशतः पञ्चचत्वारिंशत्- वर्षवयस्काः (१८-४५) युवानः सर्वाधिकं पीड्यन्ते। भारते प्रतिवर्षं पञ्चाशत्-सहस्राधिक- लक्षमिताः (१,५०,०००+) जनाः केवलं मार्गदुर्घटनाभिः म्रियन्ते, यत्र द्वि-चक्र-वाहनानां दुर्घटनाः मुख्याः सन्ति। भारते प्रतिदिनं द्वादश-शत-चतुःषष्टि-सङ्ख्यकाः (१,२६४) दुर्घटनाः जायन्ते, यासु प्रायशः चतुःशत- द्विषष्टि (४६२) जनाः प्राणान् त्यजन्ति।

### व्यावहारिक-प्रशिक्षणं सांस्कृतिक-कार्यक्रमाश्च

मध्याह्ने भोजनानन्तरं स्वयंसेवकानां पञ्चाशत्-पञ्चाशत्- सङ्ख्याकाः चत्वारः वर्गाः विरचिताः। तेभ्यः 'हृद्-फुप्फुस-पुनरुज्जीवन-विधिः', दुर्घटनानन्तरं रुधिर-स्राव-निरोधप्रक्रिया, भग्नास्थिषु काष्ठ-पट्टिका-बन्धनम् (खपचीबन्धनम्), क्षतानां वहनं शारीरिक- परीक्षणञ्च इत्याद्यानां गहनः प्रायोगिकः अभ्यासः कारितः।
अन्तिमसत्रे एकस्य भव्यस्य सांस्कृतिककार्यक्रमस्य आयोजनं सम्पन्नम्, यत्र छात्र-छात्राभिः सङ्गीतेन, नृत्येन, एकाङ्कि-नाटकाभिनयेन, काव्य-पाठेन, प्रेरकाख्यायिकाभिश्च सह महता उत्साहेन भागः गृहीतः।

## "संस्कृत कथा मञ्जरी" {२०}

**।।द्वात्रिंशत्पुत्तलिकासिंहासनम्।।**

**"अथ काश्मीरलिङ्गदानं नाम चतुर्दशोपाख्यानम्" (२)**

एवं कथयतः दैवे परमविश्वस्तस्य तस्य वाक्यमन्तर्य्यामितया विज्ञाय, येन यक्षेणास्मै राज्यं दत्तं, तेनैव चिन्तितम्- अहमेव अमुं प्रतीत्य एतद्राज्यभारमस्मै समर्पितवान् यदि इदानीं मयाऽस्य रक्षणे प्रयत्नो न क्रियते, तर्हि महत् अयशो मे भविष्यति इति विचार्य्य, स भयङ्कररूपं धृत्वा सर्वान् शत्रुन् अभीषयत्। तज्जातिभीमाऽऽकृतिमालोक्य ते सर्वे प्रतिस्पर्धिनः पलायिता बभूवुः। ततोऽसौ राजशेखरो राजा निष्कण्टकं राज्यमकरोत्। अतोऽहं ब्रवीमि 'वटवृक्षस्थिताः' इत्यादि। एषा कथा विक्रमेण योगीन्द्रं प्रति कथिता। ततो योगीन्द्रः इमां कथां श्रुत्वा अतिसन्तुष्टः सन् राज्ञे काश्मीरलिङ्गमेकं दत्त्वा अभणत्- भो राजन्! एतत् काश्मीरलिङ्गं चिन्तामणिरिव चिन्तितं वस्तु ददाति; तत् एनं सम्यक् पूजय। राजा तथाऽस्तु इत्युक्त्वा तं प्रणम्य यावन्नगरमार्गे आगच्छति, तावत् ब्राह्मणः कश्चित् समागत्य राज्ञो हस्ते तल्लिङ्गं दृष्ट्वा राजानमशीर्वादपूर्वकमवदत्- भो राजन्! प्रत्यहं मम शिवलिङ्गपूजने नियमोऽस्ति; तदनभ्यर्श्चय कदाऽपि पानीयमपि न पिबामि; किन्तु मम शिवलिङ्गं नष्टं, तेन दिनत्रयमुपोषितोऽस्मि। ततः अद्य मे एतत् शिवलिङ्गं पूजार्थं त्वया दातव्यम्। राजाऽपि तस्मै ब्राह्मणाय काश्मीरलिङ्गं दत्त्वा निजनगरमगमत्। इति कथां कथयित्वा पुत्तलिका भोजराजमवदत्- त्वयि एवमौदार्य्यादयो गुणा विद्यन्ते चेत् तर्हीव सिंहासने समुपविश। राजा तूष्णीमासीत्।

**डा. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# रुग्णानां सौकर्याय 'महावीर- वात्सल्य- चिकित्सालयाय' समुपलब्धा नवीना आधुनिका रुग्णवाहिका (एंबुलेंस)




## निगम- सामाजिक- उत्तरदायित्वस्य (CSR) माध्यमेन केनरा-वित्तकोषेण (कैनरा बैंक) प्रदत्तं साहाय्यम्; महावीर-न्यासस्य चिकित्सालयान् आधुनिक-संसाधनैः समलङ्कर्तुं प्रक्रमः

हिमसंस्कृतवार्ताः- राघव नाथ झा, पाटलिपुत्रम्

रुग्णेभ्यः श्रेष्ठतराः स्वास्थ्योपचर्याः प्रदातुं 'श्रीमहावीर- स्थानन्यास- समित्या' सञ्चालिते 'महावीर- वात्सल्य- चिकित्सालये' भृगुवासरे अपरा एका नवीना आधुनिका रुग्णवाहिका-सेवा (एंबुलेंस) समारब्धा। केनरा-वित्तकोषेण स्वकीय-निगम- सामाजिक- उत्तरदायित्वस्य अन्तर्गतम् एषा रुग्णवाहिका समर्पिता, यस्याः विधिवत् समुद्घाटनं भृगुवासरे सम्पन्नम्।

अस्मिन् मङ्गलावसरे 'श्रीमहावीर- स्थानन्यास-समित्याः' सचिवः सायण-कुणालः, संसत्सदस्या शाम्भवी चौधरी, केनरा-वित्तकोषस्य मुख्य-प्रबन्ध- निदेशकः ब्रजेशकुमारसिंहः, सहायक-मुख्य- कार्यकारी- अधिकारी बी. के. मिश्रः, महावीर- वात्सल्य- चिकित्सालयस्य निदेशकः डॉ. राजेशरञ्जनः, मन्दिर- अधीक्षकः के. सुधाकरणः, वित्तकोषस्य च उप-महाप्रबन्धकाः, महाप्रबन्धकाः अन्ये च वरिष्ठ-अधिकारिणः समुपस्थिताः आसन्।

# एकस्यामेव छत्रच्छायायां रुग्णाः प्राप्नुयुः सर्वाः सुविधाः

'श्रीमहावीर- स्थानन्यास-समित्याः' सचिवः सायण कुणालः प्रत्यपादयत् यत् समित्या सञ्चालितेषु सर्वेषु चिकित्सालयेषु रुग्णेभ्यः सुलभाम् उत्तमाञ्च चिकित्सां प्रदातुं सततं प्रयासः विधीयते। महावीर-वात्सल्य- चिकित्सालये हृद्रोगिणाम् उपचाराय आवश्यकाः अत्याधुनिक-व्यवस्थाः संवर्धिताः सन्ति। अनेन सह बालानां प्रौढानाञ्च उपचाराय उत्तमा व्यवस्था वर्तते। तेनोक्तं यत् महावीर-वात्सल्य-चिकित्सालये दूरस्थेभ्यः जनपदेभ्यः सहैव नगरस्य बृहत्- चिकित्सालयेभ्योऽपि रुग्णाः उपचाराय समागच्छन्ति। रुग्णाः परीक्षणाय उपचाराय चान्यत्र भ्रमितुं न विवशाः भवेयुः, एतदर्थं चिकित्सालयेषु आधुनिकाः परीक्षणयन्त्राणि संलभ्यन्ते। यत्र यत्र अतिरिक्त-संसाधनानाम् आवश्यकता वर्तते, तत्र चिकित्सालयेभ्यः प्रस्तावाः आहूताः। प्रस्तावान् आधृत्य नूतनयन्त्राणि अन्यानि च साधनानि सत्वरं दीयन्ते।

## स्वल्प-व्ययेन चिकित्सा-सुविधा

सायण कुणालः न्यगादीत् यत् न्यास-समित्या सञ्चालितेषु चिकित्सालयेषु जनेभ्यः न्यून-व्ययेन परीक्षणस्य उपचारस्य च सौविध्यं प्रदातुं दृढः सङ्कल्पः कृतः अस्ति। रुग्णवाहिकानां सङ्ख्यावृद्ध्या रुग्णानां चिकित्सालयम् आनयन-नयनकार्ये महती सुकरता भविष्यति।

तेन संसूचितं यत् 'महावीर- आरोग्य-चिकित्सालयस्य' नूतन-भवनस्य निर्माणम् अपि द्रुतगत्या प्रचलति। भवन-निर्माणे समाप्ते सति चिकित्सा-सुविधानां भूयान् विस्तारः विधास्यते। साम्प्रतिक-समये महावीर-आरोग्य-चिकित्सालयः समीपस्थे एकस्मिन् भवने सञ्चाल्यते, यत्र रुग्णानाम् उपचारः अविरतं प्रचलति

# ऋषिभिः सहस्रवर्षपूर्वमेव वैज्ञानिकसिद्धान्ताः प्रतिपादिताः, येषां अन्वेषणं आधुनिकविज्ञानमद्यापि करोति- "कमलाभारद्वाजः"




**वार्ताहरः— कुलदीपमैन्दोला**

उत्तराखण्ड-संस्कृत-संस्थानहरिद्वारद्वारा राजकीय-महाविद्यालयस्य जखोली-रुद्रप्रयागजनपदे संस्कृतमासमहोत्सवस्य उपलक्ष्ये "भारतीय-ऋषीणां वैज्ञानिकचिन्तनम्" इत्यस्मिन् विषये एकदिवसीया सङ्गोष्ठी सफलतया सम्पन्ना।कार्यक्रमस्य शुभारम्भः दीपप्रज्वलनेन वैदिकमङ्गलाचरणेन च अभवत्।

प्रास्ताविकमुद्बोधनं संस्थानस्य सचिवेन प्रो. विनयविद्यालङ्कारमहाभागेन कृतम्। तेन उक्तं यत् भारतीय-ऋषीणां ज्ञान-विज्ञानपरम्परा अद्यापि विश्वस्य मार्गदर्शिका वर्तते। सः मञ्चासीनाः सर्वाः विदुषीः सम्मानपूर्वकमभिनन्दितवान्। सङ्गोष्ठ्याः मुख्यवक्त्री डा. कमलाभारद्वाजमहाभागा वेदेषु निहितं खगोलशास्त्रं, गणितं, आयुर्वेदं, पर्यावरणविज्ञानं, सृष्टिविज्ञानं, चिकित्साविज्ञानं तथा यज्ञविज्ञानं विस्तरेण निरूपितवती। तया प्रतिपादितं यत् ऋषिभिः सहस्रवर्षपूर्वमेव वैज्ञानिकसिद्धान्ताः प्रतिपादिताः, येषां अन्वेषणं आधुनिकविज्ञानमद्यापि करोति।

विशिष्टातिथिः डा. प्रीति अवदत् यत् ऋषीणां चिन्तनं केवलमाध्यात्मिकं न, अपितु पूर्णतया वैज्ञानिकं तार्किकं च आसीत्। मुख्यातिथिः डा. इन्दिराजुगराणमहाभागा विद्यार्थिनः संस्कृतस्य वैज्ञानिकस्वरूपं ज्ञातुं प्रेरितवती।

कार्यक्रमे महाविद्यालयस्य प्राचार्या डा. माधुरी उपस्थितासीत्। अध्यक्षतां हिन्दीविभागाध्यक्षः डा. सुभाषकुमारः अकरोत्। संयोजिकायाः डा. भारत्याः तथा सहसंयोजिकायाः कुमारी सुमनायाः नेतृत्वे कार्यक्रमस्य सफलसञ्चालनम् अभवत्। अस्यां सङ्गोष्ठ्यां प्रायः ८० प्रतिभागिनः सहभागिनोऽभवन्। रुद्रप्रयागः, ऋषिकेशः, टिहरी, पिथौरागढः, हल्द्वानी, चम्पावतः, देहरादूनं, बडकोटः, पुरोला, उत्तरकाशी, कोटद्वारं तथा हरिद्वारादिभ्यः आगताः प्राध्यापकाः, शोधछात्राः, विद्यार्थिनः च उत्साहेन सहभागीभूताः। अन्ते संस्कृतविभागप्रभारी संयोजिका डा. भारती समस्तेषामतिथीनाम् आभारं व्यक्तवती।



# खगडियानगरे १०२ छात्रैः

## अन्वेषितानि तकनीकीसमाधानानि

**खगडिया, १९ सितम्बर**
**वार्ताहरः:- डॉ विमलेश झा**

बिहारराज्यस्य खगडियास्थिते राजकीय-अभियान्त्रिकी-महाविद्यालये स्मार्ट इण्डिया हैकाथॉन-२०२६ इत्यस्य अन्तर्गते आन्तरिक-हैकाथॉन-प्रतियोगितायाः आयोजनं सम्पन्नम्। प्रतियोगितायां महाविद्यालयस्य १७ छात्रदलानां १०२ छात्र-छात्राणां सक्रियसहभागिता अभवत्। प्रतिभागिभिः वास्तविकजीवनसम्बद्धानां विविधसमस्यानां समाधानार्थं स्वकीयाः अभिनवाः तकनीकीपरिकल्पनाः निर्णायकमण्डलस्य समक्षं प्रस्तुताः।अस्य आयोजनस्य मूलोद्देश्यं विद्यार्थिषु नवोन्मेषस्य, सृजनात्मकचिन्तनस्य, तार्किकचिन्तनस्य तथा समस्यासमाधानकौशलस्य विकासः आसीत्। कार्यक्रमेण विद्यार्थिभ्यः स्वकीयप्रतिभां प्रदर्शयितुं तथा तकनीकीज्ञानस्य व्यावहारिकजीवने उपयोगं ज्ञातुं महत्त्वपूर्णः अवसरः प्रदत्तः। आन्तरिकहैकाथॉनस्य माध्यमेन विद्यार्थिभ्यः केवलं स्वकीयविचाराणां प्रस्तुत्यवसरः एव न प्राप्तः, अपितु वास्तविकजीवनस्य समस्याः सम्यक् अवगन्तुं, तासां कारणानि विश्लेषणं कर्तुं तथा तकनीकीमाध्यमेन तासां व्यावहारिकसमाधानानि अन्वेष्टुं अवसरः अपि प्राप्तः। प्रतियोगितायां विभिन्नानि छात्रदलानि स्वकीयाः परियोजनाः, प्रतिरूपाणि, कार्यपरिकल्पनाः च निर्णायकमण्डलस्य समक्षं प्रस्तुतवन्तः। प्रस्तुतिषु विद्यार्थिनां नवोन्मेषशीलता, सृजनात्मकता, तार्किकदृष्टिः, तकनीकीदक्षता तथा सामूहिककार्यभावना स्पष्टतया परिलक्षिता। कार्यक्रमस्य समन्वयं स्मार्ट इण्डिया हैकाथॉन-२०२६ इत्यस्य समन्वयाधिकारी प्रो. अभिषेककुमारः कृतवान्। तेन विद्यार्थिनः नवोन्मेषस्य संस्कृतिं स्वीकर्तुं प्रेरिताः। तेन उक्तं यत् तकनीकीशिक्षायाः उद्देश्यं केवलं विषयसम्बद्धज्ञानस्य अर्जनं न, अपितु तस्य ज्ञानस्य उपयोगेन समाजस्य उद्योगजगतश्च समक्षं विद्यमानानां विविधसमयानां समाधानं कर्तुमपि अस्ति।तेन विद्यार्थिभ्यः स्वकीयाः तकनीकीक्षमताः निरन्तरं संवर्धयितुं, नूतनानां प्रयोगाणां प्रति उन्मुखीभवितुं तथा समस्यासु नवीनदृष्टिकोणं विकसितुं च आह्वानं कृतम्। तेन कथितं यत् हैकाथॉन-सदृशाः कार्यक्रमाः विद्यार्थिनां कल्पनाशक्तिं व्यावहारिकपरियोजनासु परिणमयितुं महत्त्वपूर्णं मञ्चं प्रददति।महाविद्यालयस्य प्राचार्यः डॉ. मणिभूषणः सर्वेभ्यः प्रतिभागिभ्यः छात्रदलेभ्यश्च शुभकामनाः प्रदत्तवान्। तेन विद्यार्थिनां उत्साहस्य, परिश्रमस्य तथा अभिनवप्रयासानां प्रशंसा कृता। प्राचार्येण उक्तं यत् एतादृशाः आयोजनाः विद्यार्थिनः राष्ट्रियस्तरीयतकनीकीप्रतियोगितानां कृते सिद्धतां कर्तुं महत्त्वपूर्णां भूमिकां निर्वहन्ति। एतेषां माध्यमेन विद्यार्थिषु नेतृत्वक्षमता, परस्परसहयोगः, सामूहिककार्यकौशलं तथा नवोन्मेषशीलता विकसिताः भवन्ति। दलरूपेण कार्यं कुर्वतां विद्यार्थिनां न केवलं तकनीकीज्ञानं सुदृढं भवति, अपितु परस्परविचाराणाम् आदानप्रदानस्य तथा सामूहिकरूपेण समाधाननिर्माणस्य अनुभवोऽपि प्राप्यते। आन्तरिक-हैकाथॉन-प्रतियोगितायां सहभागितां कृतवद्भ्यः सर्वेभ्यः १०२ छात्र-छात्रेभ्यः ई-प्रमाणपत्राणि प्रदास्यन्ते। आयोजनेन विद्यार्थिभ्यः स्वकीयविचारान् व्यावहारिक-तकनीकीसमाधानरूपेण परिणेतुं तथा सामाजिक-औद्योगिकक्षेत्रेषु विद्यमानानां समस्याणां समाधानार्थं कार्यं कर्तुं अवसरः प्राप्तः। राजकीयअभियान्त्रिकीमहाविद्यालये, खगडियायां आयोजितः अयं आन्तरिक-हैकाथॉन-कार्यक्रमः तकनीकीशिक्षां व्यावहारिकप्रयोगेन सह संयोजयन् विद्यार्थिनां नवोन्मेषप्रतिभायाः विकासाय समस्यासमाधानकौशलस्य संवर्धनाय च महत्त्वपूर्णं मञ्चं सिद्धः अभवत्।



हिमसंस्कृतवार्ताः, ईदरधीरजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये।

**काव्या-** नमस्ते नन्दिनि। मया अद्य काश्चन विचित्राः वार्ताः आनीताः। प्रथमा वार्ता मुम्बई-विमानस्थानकात् प्राप्ता।

**काव्या-** एकेन व्यापारिणा स्वभार्यायै असत्यम् उक्तम्। तेन परस्त्रिया सह विदेशयात्रा कृता।

**काव्या-** विमानस्थानके तस्याः पारपत्रं दूषितम् इति अधिकारिभिः ज्ञातम्। भयात् तेन व्यापारिणा 'अहम् अपहृतः' इति सन्देशः प्रेषितः।

**काव्या-** अन्ते तस्य रहस्यं प्रकाशितं, सः च आरक्षकैः धृतः।

**नन्दिनी-** अहो, कियत् हास्यास्पदम्! स्वदोषं गोपायितुं तेन महती मूर्खता कृता। इदानीं द्वितीया वार्ता का?

**काव्या-** द्वितीया वार्ता पुणेनगरात् श्रुता। तत्र द्वाभ्यां भ्रातृभ्यां एकविंशति-सहस्र-जलपूरिकाभिः गणेशमूर्तिः रचिता।

**काव्या-** उत्सवार्थं ताभ्याम् एषः उपायः कृतः।

**नन्दिनी-** जलपूरिकाभिः निर्मिता मूर्तिः! अतीव रोचकं खलु, जनेभ्यः महद् आश्चर्यं दत्तम्। अग्रे तृतीया वार्ता का अस्ति?

**काव्या-** तृतीया वार्ता नार्वे-देशात् प्राप्ता। तत्र आरक्षकैः एकं यानं मार्गे चलत् अपि कम्पमानं दृष्टम्।

**काव्या-** तस्मिन् याने बहु-मूल्यानि रजत-नाणकानि प्राप्तानि।

**काव्या-** सप्तषष्टिसहस्रं नाणकानि तत्र आनीतानि। तत् धनं वञ्चकैः चोरितम्।

**नन्दिनी-** तावन्ति रजत-नाणकानि! वञ्चकैः महत् साहसं कृतम्। अन्तिमा वार्ता का?

**काव्या-** अन्तिमा वार्ता गुर्जर-राज्यात् श्रुता। तत्र एका खादनस्पर्धा आयोजिता।

**काव्या-** तत्र एकेन नरेण अर्ध-घण्टायाम् अष्टाविंशतिः मोदकाः खादिताः।

**काव्या-** सः तस्याः स्पर्धायाः विजयी जातः।

**नन्दिनी-** अष्टाविंशतिः मोदकाः! आश्चर्यम्। तेन महोदरं प्राप्तम्।

**नन्दिनी-** सर्वाः वार्ताः अतीव विचित्राः। धन्यवादः काव्ये।

# सरलतायाः

## निष्कपटतायाश्च सन्देशं ददाति उत्तमार्जवधर्मः



**भागलपुरम्, १९ सितम्बर २०२६।**
**हिमसंस्कृतवार्ताः- डॉ विमलेश झा**

बिहारराज्यस्य भागलपुरनगरे दशधर्मलक्षणमहापर्वणः तृतीयदिने उत्तमार्जवधर्मः श्रद्धया भक्त्या च समनुष्ठितः। अस्मिन्नवसरे प्रवचनमाध्यमेन सरलता, सहजता तथा निष्कपटजीवनस्य महत्त्वे विशेषरूपेण बलं दत्तम्। अद्यत्वे जीवने आडम्बरस्य कृत्रिमतायाश्च प्रभावः वर्धमानः अस्ति। एतादृशे समये जैनधर्मस्य उत्तमार्जवधर्मः मानवाय सरलतया निष्कपटतया च जीवनं यापयितुं प्रेरणां ददाति। एतमेव भावमधिकृत्य शुक्रवासरे भागलपुरनगरे दशधर्मलक्षणमहापर्वणः तृतीयदिने उत्तमार्जवधर्मः श्रद्धाभक्तिपूर्वकं आचरितः। दशधर्मलक्षणमहापर्वणः कार्यक्रमे शनिवासरे उत्तमशौचधर्मस्य विशेषपूजाराधना च आयोजयिष्यते। महापर्वणः काले जैनसमाजे प्रत्येकं धर्मस्य माध्यमेन आत्मसंयमस्य, आत्मशुद्धेः तथा श्रेष्ठजीवनमूल्यानां विषये चिन्तनं क्रियते। भागलपुरे आयोजितैः धार्मिककार्यक्रमैः श्रद्धालवः एतेषां सिद्धान्तानां स्वकीयदैनन्दिनजीवने अनुप्रयोगं कर्तुं प्रयतन्ते। उत्तमार्जवधर्मस्य मुख्यः सन्देशः अपि अयमेव यत् मनुष्यस्य विचारेषु, वचनेषु आचरणे च सरलता निष्कपटता च सदैव भवेत्।मारवाड़ीटोलालेनस्थिते दिगम्बरजिनमन्दिरे अपि उत्तमार्जवधर्मस्य उपलक्ष्ये विशेषपूजायाः प्रवचनस्य च आयोजनं कृतम्। कार्यक्रमः पूज्यार्यिका श्री १०५ पूर्णमतिमातुश्री तथा श्री १०५ दिव्यमतिमातुश्री ससंघस्य सान्निध्ये आयोजितः। मातुश्री उक्तवती यत् मनसा, वाचा, कर्मणा च सरलता, निष्कपटता एकरूपता च उत्तमार्जवधर्मस्य स्वरूपम् अस्ति। तया श्रद्धालुभ्यः स्वव्यवहारे सहजतां तथा विचारेषु निर्मलतां धारयितुं सन्देशः प्रदत्तः।

जैनसमाजस्य अध्यक्षः विजयजैनः उक्तवान् यत् कपटमुक्तेन निर्मलेन च मनसा एव आत्मनः वास्तविकं स्वरूपं प्रकटते। तेन उत्तमार्जवधर्मः आत्मशुद्ध्या उत्तमजीवनमूल्यैश्च सह सम्बद्धः इति स्पष्टतया प्रतिपादितम्।

मारवाड़ीटोलालेनस्थिते जिनमन्दिरे आयोजिते धार्मिककार्यक्रमे बहवः श्रद्धालवः समुपस्थिताः अभवन्। अस्मिन् कार्यक्रमे विपुलकुमारजैनः, कमलेशजैनः, अमितबड़जात्याः, अजीतजैनः, काशीनाथः, राजेशकुमारः, रमनजैनः, विजयकुमारः , कमलकुमारः, विशालः च अन्ये च श्रद्धालवः उपस्थिताः आसन्।






# संस्कृतशोधस्य अङ्गीकरणे आर. बी. एस. महाविद्यालयस्य महती उपलब्धिः - ‘संस्कृतभाषीयविश्लेषणोपकरणस्य’ अभिकल्पनायै भारतसर्वकारेण पञ्जीकरणम्

**(संवादकः:- प्रवेशकुमारशुक्लः , आगरा** आगरा-नगरस्थितस्य आर. बी. एस. महाविद्यालयस्य प्राचार्येण प्रो. विजयश्रीवास्तवेन विकसितस्य अभिनवस्य “SANSKRIT LINGUISTIC ANALYSIS DEVICE” इत्याख्यस्य, अर्थात् अङ्कीयसंस्कृतपाठानुसन्धानार्थं दत्तांश-संसाधनोपकरणस्य, अभिकल्पनायै भारत-सर्वकारस्य पेटेण्ट्, अभिकल्पना-व्यापारचिह्न-महानियन्त्रकस्य कार्यालयेन (बौद्धिकसम्पदा-भारतम्) आधिकारिकं पञ्जीकरणं प्रदत्तम्। अस्मिन् उल्लेखनीये कार्ये प्रो. विजयश्रीवास्तवस्य सह राष्ट्रस्तरीयौ ख्यातिलब्धौ संस्कृताचार्यौ प्रो. प्रसूनदत्तसिंहः तथा च प्रो. अनिलप्रतापगिरिः इत्येतयोः योगदानम् अपि अविस्मरणीयम् अस्ति। भारतसर्वकारेण निर्गते अभिकल्पना-पञ्जीकरणप्रमाणपत्रानुसारं उक्तस्य उपकरणस्य अभिकल्पनासङ्ख्या 511126-001 इति अस्ति। सा 14-02 वर्गस्य अन्तर्गतं २०२६ तमस्य वर्षस्य जुलाई-मासस्य २७ दिनाङ्कात् पञ्जीकृता अस्ति। अस्याः पञ्जीकरणस्य आधिकारिकं प्रमाणपत्रं २०२६ तमस्य वर्षस्य सितम्बर-मासस्य ८ दिनाङ्के निर्गतम्। माननीयया कुलपतिना प्रो. आशुरानीवर्यया प्रेषिते सन्देशे उक्तं यत् एतत् नवोन्मेषकार्यार्थं प्रेरणास्तम्भरूपेण कार्यं करिष्यति। सा प्रो. विजयश्रीवास्तवं हार्दिकतया अभिनन्द्य अवदत् यत् एषा उपलब्धिः महाविद्यालयस्य विश्वविद्यालयस्य च अनुसन्धानक्षमतायै शैक्षणिकश्रेष्ठतायै च राष्ट्रियरूपेण अन्तर्राष्ट्रियरूपेण च नूतनां प्रतिष्ठां प्रदास्यति। भारतीयभाषाणां प्राचीनज्ञानपरम्परायाश्च आधुनिकप्रौद्योगिक्या सह समन्वयस्य दिशि कृतमिदम् अभिनवप्रयासं ‘विकसितभारतम्’ इति सङ्कल्पाय नूतनां शक्तिं प्रदास्यति। एतत् नवोन्मेषकार्यं विश्वविद्यालये उच्चस्तरीयसंशोधनस्य, व्यावहारिकोपयोगस्य, तथा पेटेण्ट्-अभिकल्पना-पञ्जीकरणरूपस्य बौद्धिकसम्पदधिकारस्य (IPR) संस्कृतेः सुदृढीकरणे महत्त्वपूर्णं योगदानं करिष्यति।

प्रो. विजयश्रीवास्तवः अस्याः उपलब्धेः श्रेयः महाविद्यालयस्य प्रबन्धनाय, विशेषतः युवराज-अम्बरीशपालसिंहमहोदयाय, संस्कृतविभागस्य सहयोगिभ्यः आचार्येभ्यः, समस्तेभ्यः शोधार्थिभ्यश्च समर्पितवान्। अभिकल्पना-अधिनियमः, 2000 तथा अभिकल्पना-नियमाः, 2001 इत्येतयोः प्रावधानानुसारं पञ्जीकृतमिदम् उपकरणं संस्कृतपाण्डुलिपिषु, ग्रन्थेषु, अङ्कीयपाठेषु च विद्यमानानां भाषिकप्रतिरूपाणां, व्याकरणिकसंरचनानां, सन्दर्भगततत्त्वानां च अत्यल्पसमये अन्वेषणं विश्लेषणं च कर्तुं समर्थम् अस्ति। अनेन उपकरणेन देशविदेशेषु विद्यमानेभ्यः शोधार्थिभ्यः संस्कृताध्ययने, पाण्डुलिप्यनुसन्धाने, संस्कृतपाठानां विश्लेषणे च व्यापकः लाभः भविष्यति।प्रो. विजयश्रीवास्तवस्य योगदानं संस्कृतसाहित्ये, भारतीयज्ञानपरम्परायां, शिक्षाक्षेत्रे च अत्यन्तम् उल्लेखनीयम् अस्ति। तस्य निर्देशनस्य अन्तर्गतं बहवः शोधार्थिनः विद्यावारिधि-पदवीं (Ph.D.) प्राप्तवन्तः। तस्य उल्लेखनीयशैक्षिकयोगदानस्य कृते उत्तरप्रदेशस्य राज्यपालया श्रीमत्या आनन्दीबेनपटेल-महोदयया डॉ. भीमराव-अम्बेडकर-विश्वविद्यालयस्य, आगरा, द्विनवतितमे दीक्षान्तसमारोहे ‘सर्वश्रेष्ठशिक्षकसम्मानः’ अपि प्रदत्तः अस्ति।

अस्याः गौरवपूर्णायाः उपलब्धेः उपलक्ष्ये महाविद्यालयस्य विभागप्रभारिषु, शिक्षकवर्गे, छात्रेषु, छात्रासु, शोधार्थिषु, संस्कृतप्रेमिषु च महान् हर्षः व्याप्तः अस्ति। सर्वैः प्राचार्याय हार्दिक्यः शुभकामनाः अभिनन्दनानि च समर्पितानि। सर्वे च विश्वासं प्रकटितवन्तः यत् अयम् अभिकल्पनापञ्जीकृतः नवोन्मेषः भारतीयभाषाणां संस्कृतानुसन्धानस्य च वैश्विकस्तरे नूतनां प्रतिष्ठां स्थापयितुं महत्त्वपूर्णं साधनं भविष्यति।




## " फोरलेन "

असां तुसां जो काहलु गलाया
फोरलेन बनाणे जो,
ये ही सड़कां भतेरियां थियां
माहरे ओणे-जाणे जो।
कुनी गलाया था तुसां जो इन्हा
देवी-देवतयां दे मन्दिरा ढाणे जो।
सौ-सौ मन्नतां मंगता पोंदियां
देआं-देवतयां मनाणे जो।
आव-ताव तुसां कुछ नी दिखया,
जोर दिता जे.सी.वी. चलाणे जो।
हाखीं सामणे घर जे ढाये,
कुछ नी रेहा गलाणे जो।
घर छुडा कोई घर नी हुंदा
टैम लगदा गृहस्थी बसाणे जो।
नोआं भला बणाई लइए,
टैम लगदा पराणियां यादां जो भुलाणे जो।
रोजी रोटी मिलती थी दुकाना ते
हुण कुछ नी रेहा कमाणे जो।
थड़े पराणे तुसां पुट्टी दिते,
कई पुस्तां लगदियां थड़े जमाणे जो।
पैसे तुसां मते भारी दिते
लोकां जो घरे बनाणे जो।
पैसयां सोगी जोर कने दिमाग भी लगदा,
इकी घरे बनाणे जो।
डालां बढ़ी कलथर पाये,
कुछ नी सोचया डालां दे बचाणे जो।
इकी पहाड़े बनणे जो लगदियां सदियां,
पर मिंनट नी लगदा ढाणे जो ।
कदी नी पुजणे ते देर भली,
इक गल करां समझाणे जो।
देवभूमि है मेरा हिमाचल,
कुछ जतन करना इसजो बचाणे जो।



अनीता भारद्वाज गांव भट्ट
जिला कांगड़ा हिमाचल प्रदेश

# सायर (सैर) पर्व —
# कांगड़े दी मिट्टिया दी खुशबू

सायर या सैर, जिस जो असां कांगड़े आह्ले सैर, सैरें जां सेरें बी बोलदे आं, बड़ा प्यारा ते खुशी-खुशी मनाया जाणे वाला त्यौहार है।
कई लोक बोलदे कि 'सै' मतलब 'वो' ते 'रैं' मतलब 'रहे', यानी—वो रहे, सदा रहे, घर-परिवार सुखी रहे।
कने इक मतलब एह बी कड्डदे कि बरसातां दे दिनां च लोकां दा ज्यादातर टैम घरां अंदर ही लंघदा था। हुण जालू बरसातां घटी जांदीयां कने मौसम खुली जांदा ऐ, तां सैर करने या बाहर निकलने दा टैम आइ जांदा है। इस करके सैर सबना दे घरे खुशियां, सुख-समृद्धि ते चंगे भाग ल्यी करी ओए—एह असां सारयां दी प्रार्थना है। हिमाचल दे कई इलाक्यां च सैरी दा त्यौहार बड़ी धूमधाम कन्नै मनाया जांदा ऐ। खास करी के कांगड़ा, मंडी, सोलन, हमीरपुर, शिमला, कुल्लू कने बिलासपुर आह्ले पासे इस त्यौहार दी रौनक बड्डी भारी दिखाई दिंदी ऐ। एह त्यौहार आश्विन मास री संक्रांति, जालू सूरज कन्या राशि च प्रवेश करदा ऐ, उस बखत मनाया जांदा ऐ।
असल च साडे पहाड़ी इलाक्यां च बरसात कोई मामूली गल्ल नीं हुंदी। घणियां-घणियां बरसात, नदी-नाले पूरे चढ़यो, रस्ते बंद, कच्चे रस्ते खराब—जिंदगी बड़ी मुश्किल होई जांदी थी। रोजी-रोटी कमाणे ताईं कई बार लोकां जो उफनदे नाले ते दरिया भी पार करने पोंदे थे। काल्लि भी कोई अप्रिय घटना होइ जांदी तां पूरा ग्रां डरी जांदा।बरसातां दे दिनां च मक्खी-मच्छर, सर्प-बिच्छू कने होर जीजू कंडू बी बड़िया गिनतिया च निकलदे। बीमारी फैलणे दा डर अलग। बच्च्यां जो बी लगभग दो महीने स्कूलां दी छुट्टी होई जांदी थी। मतलब बरसाती दा मौसम पहाड़ी जीवन ताइं बडिया परीक्षा साइ हुंदा था।भिरि ओंदी ऐ आश्विन संक्रांति। यानी की संग्रांद मौसम बदलणा शुरू होई जांदा। बरसातां विदा होणां लगदियां। कने शरद ऋतु दा आगमन हुंदा। आसमान खुल्ला, हवा च ठंडक, खेतां च नई फसलां दी रौनक। कने चारों पासे इक नोइ उमंग। बरसातां च डराणे वाले कई कीड़े-मकौड़े हुण घटी जांदे, कने शरद ऋतु दे सीतू, झींगुर साइयें कीड़े आवाजां करदे सुनाई दिंदे। पुराने लोक इनां जो शुभ संकेत मनदे थे। इनां दी आवाज इंहां लगदी मन्ना एह गलादे— "लो जी, बरसातां गईयां, हुण सुखां वाला मौसम आई गेया।" इसी बखत खेतां च मक्की, धान ते होर नोइयां फसलां तैयार होणा लगदियां । बागां च अखरोट, अमरूद, अनार, खट्टे-काकड़ियां, दून्ज ते होर मौसमी फल पकणा लगी पोंदे।भिरी कांगड़े दे घरां च सैरी दीयां असली रौनकां लगदीयां।
घरां जो गोबर कणै लीपी-पोती करी चकाचक करी रखदे । घर-बार सजाई के, सफाईया दा पूरा ध्यान रखदे । घरे दी चौकी मतलब चौके च नोईं फसल, फल कने घरै दे बनाए पकवानां जो सजांदे। इनां जो रखी के पूजा करदे। कई जगह तां अज्ज बी पुराणी रीति निभाई जांदी ऐ। जाति-विशेष दे लोक टोकरिएच नोईं फसलां दे फल लेई के घरे-घरे जांदे, जोत जगांदे ते सायर देवी दी वंदना करवांदे।
रक्षाबंधन वाले दिन बहनां जिहड़ी रखड़ी बनियो, सैरी वाले दिने तिसा रखड़िया खोली के तां तूं सुटणे दी बजाय पूजा वालिया जगह च चढ़ाइंदे कने बादे च विधि अनुसार प्रवाहित करिंदे।कने ब्याह होणे बाद पैली बरसात पयोकियां कट्टणे बाद, नोई ब्याहती फिरी अपणे ससुरालै आइ जांदी।
सैरी वाले दिने कांगड़े दे ग्रां च इक होर बड़ी प्यारी परंपरा है कि— लोक इक-दूजे दे घर जांदे, बड़े-बुजुर्गां दे पैरां छूहंदे कने आशीर्वाद लैंदे।
नोइं फसल घरे आई, मतलब अन्न रूपी धन घरे आई गया। अखरोट कने होर फसलां-फलां जो बेची के घरां च पैसा बी औंदे। इसी करके कालांतर च अखरोटां कन्नै खेलने दी परंपरा बनी, कने हौली-हौली कई जगह तां एह परंपरा पैसें कन्नै खेलने तक पुजी गई। कांगड़े-पालमपुराले पासे सैरी जो मिठड्डू, भटूरू, रोटियां, भल्ले कने होर कई किस्मां दे पकवान बनदे। घरां च खुशबू फैली जांदी।फिरी अपने, पराए, पड़ोसी—सारे कट्ठे बैठदे,खांदे, खिलांदे ते खुशियां बंडदे।एह त्यौहार असल च सिर्फ इक दिन दा त्यौहार नीं—एह प्रकृति दा धन्यवाद ऐ, नोइयां फसला दा स्वागत ऐ, बरसातां दे सकुशल बीती जाणे दी खुशी ऐ कने अपने लोकां सोगी मिली करी-बैठणे दा बहाना ऐ।पर अज्ज इक चिंता बी ऐ।
अहां दे बच्चे हौली-हौली अखरोटां कन्नै खेलने, ग्रां च घूमणे, बड़े-बुजुर्गां आली जाइ करी आशीर्वाद लैणे दी पुराणे रीति-रिवाजां जो भूलदे जा दे। मोबाइल फोने बच्च्यां दा टैम अपने कब्जे च करी लेया ऐ।
असां दूजे प्रदेशां दे त्यौहार बड़े चाए कन्नै मनांदे आं—महाराष्ट्र दी गणेश वंदना होवे जां देश दे होर त्यौहार। क्रिसमस दे मौके ते बच्चे लाल कपड़े पांदे कने, फोटो खिचवांदे , सोशल मीडिया च बड़े चाए कन्नै सांझे करदे —एह सब अच्छा ऐ, दूज्यां दी संस्कृति दा सम्मान करना चाहिदा।पर सोगी सोगी अपणी कांगड़ी या हिमाचली संस्कृति, अपणी बोली, अपणे लोक-पर्व ते अपणी परंपरां जो बी नीं भुलणा चाहिदा।
ओआ, इस सैरी दे मौके पर इक छोटा जेहा प्रण करिए—अपणे बच्च्यां जो सैरी दी कहानी सुना
अपणी मिट्टिया सोगी, संस्कृति कन्नै जोड़ा ।
उन्हां जो सिर्फ रीति नीं, उस रीति दे पिच्छे दा तर्क बी समझाना।ताईं सै संस्कृति अहां दे घरां, अहां दे आंगणां अहां दे बच्च्यां दे जीवन च जिंदा रै।
सायर पर्व दी तों सबना जो बड़ी-बड़ी बधाई!
सुख रहे, परिवार रहे, फसलां भरपूर होंन,
ते हर घरे च हंसी-खुशी बनी रै।

